तपस्विनस्तपःशीलाः, दानशीला दाननिरताः, कुलीना महाकुलप्रसूताः, सत्यवादिनः नाम सत्यवदनशीलाः, धर्मप्रधाना न त्वर्थकामप्रधानाः, ऋजवो नाम अकुटिलता, पुत्रवन्तो विद्यमानपुत्रः, धनान्विता बहुसुवर्णादि धनयुक्ताः, श्रौतस्मार्त्तक्रियापराः नाम नित्यनैमित्तिकानुष्ठानरताः, एवंभूताः पुरुषास्त्र्यवराः (त्रयः अवरा न्यूना येषां ते त्र्यवरा त्रिभ्योऽर्वाक् न भवन्ति) साक्षिणः भवन्ति । परतस्तु यथाक्रमं भवन्तीत्यर्थः । जातिमनतिक्रम्य यथा जाति । जातयो मूर्धावसिक्ताद्याः अनुलोमजाः प्रतिलोमजाश्च । तत्र मूर्धावसिक्तानां मूर्धावसिक्ताः साक्षिणो भवन्ति । एवमम्बष्ठादिष्वपि द्रष्टव्यम् । वर्णाः ब्राह्मणादयः । तत्र ब्राह्मणानां ब्राह्मणा एवोक्तलक्षणा उक्तसंख्यकाः साक्षिणो भवन्ति । एवं क्षत्रियादिष्वपि ज्ञेयम् । तथा स्त्रीणां साक्ष्यं स्त्रिय एव कुर्युः । सजातिसवर्णासम्भवे सर्वे मूधावसिक्तादयो ब्राह्मणादयश्च सर्वेषु मूर्धावसिक्तादिषु ब्राह्मणादिषु च यथासम्भवं साक्षिणो भवन्ति ।

के असाक्षिणाः भवन्ति, अस्मिन् प्रसङ्गे याज्ञवल्क्येनोक्तं यत् –

**स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः ।**
**रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः ।।**

**पतिताप्तार्थसंबन्धिसहायरिपुतस्कराः ।**
**साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः ।।**[1]

अर्थात् स्त्री प्रसिद्धा, बालोऽप्राप्तव्यवहारः, वृद्धोऽशीतिकावरः, “वृद्ध”ग्रहणं वचनं निषिद्धानामन्येषामपि श्रोत्रियादीनामुपलक्षणार्थं कितवोऽक्षदेवी, मत्तः पानादिना, उन्मत्तो ग्रहविष्टः, अभिशस्तोऽभियुक्तो ब्रह्महत्यादिना, रङ्गावचारी चारणः, पाखण्डिनो निर्ग्रन्थप्रभृतयः । कूटकृत् कपटलेख्यादिकारी, विकलेन्द्रियः श्रोत्रादिरहितः, पतितो ब्रह्महादि, आप्तः सुहृत्, अर्थसम्बन्धी नाम विप्रतिपद्यमानार्थसम्बन्धी, सहाय एककार्यः, रिपुः शत्रुः, तस्करः स्तेनः, साहसी बलावष्टम्भकारी । दृष्टदोषो दृष्टविरुद्धवचनः, निर्धूतो बन्धुभिस्त्यक्तः । एते स्त्रीबालादयः साक्षिणो न भवन्ति ।

**दिव्यप्रमाणम् –**

लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषं प्रमाणम् आलोचनं जातम् । इदानीं दिव्यप्रमाणविषये आलोच्यते । मानुषप्रमाणाभावे दिव्यप्रमाणं भवति । पुनश्च राजद्रोहापराधः तथा महापापाद्यपराधसमये तत्र शङ्का भवतिश्चेत तत्र दिव्यप्रमाणं भवति । दिव्यप्रमाणं पञ्चविधम् । यथा – तुला, अग्निः, आपोः, विषः, कोशः ।

(क) तुलाविधिः —

तुलाविधिविषये याज्ञवल्क्येनोक्तं यत् –

**तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।**
**प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः ।।**

1. याज्ञवल्क्यस्मृतिः – २/७०, ७१ ।

**त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ।**
**तत्सत्यं वद कल्याणि! संशयान्मां विमोचय ।।**
**यद्यस्मि पापाकृन्मातस्ततो मां त्वमधो नय ।**
**शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् ।।**[1]

अर्थात् तुलाया धारणं तोलनं ये विदन्ति सुवर्णकारप्रभृतयस्तैः प्रतिमानेन मृदादिना समीभूतः समीकृतस्तुलामाश्रितोऽधिरूढोऽभियुक्तोऽभियोक्ता वा दिव्यकारी रेखां कृत्वा येन संनिवेशेन प्रतिमानसमीकरणदशायां शिक्यतलेऽवस्थितस्तस्मिन्पाण्डुलेखेनाङ्कयित्वाऽवतारितस्तुलामभिमन्त्रयेत् प्रार्थयेत् अनेन मन्त्रेण – **हे तुले! त्वं सत्यस्य स्थानमसि । पुरा आदिसृष्टौ देवैर्हिरण्यगर्भप्रभृतिभिर्विनिमितोत्पादिता । तत्तस्मात्सत्यं संदिग्धस्यार्थस्य स्वरूपं वद दर्शय:** ।। हे मात: यदि अहं पापकृदसत्यवाद्यस्मि ततो मां त्वमधो नय । यदि अहं शुद्धः सत्यवाद्यस्मि ततो मां ऊर्ध्वे गमयेति । पुनश्च केषां कृते तुलाधिकारिण भवति इत्यस्मिन् प्रसङ्गे याज्ञवल्क्येनोक्तं यत् –

**तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।**[2]

अर्थात् स्त्री स्त्रीमात्रं जातिवयोवस्थाविशेषानादरेण, बाल आषाडशाद्वर्षा जातिविशेषानादरेण, वृद्धोऽशीतिकावरः, अन्धो नेत्रविकलः, पङ्गुः नाम पादविकलः, ब्राह्मणो जातिमात्रम्, रोगी व्याधितः, एतेषां शोधनार्थं तुलादिव्यप्रमाणं नियम्यते ।

**अग्निदिव्यप्रमाणम् –**

अस्मिन् प्रसङ्गे महर्षियोगीश्वरेण याक्षवल्क्येनोक्तं यत् –

**करौ विमृदित व्रीहेर्लक्षयित्वा ततो न्यसेत् ।**
**सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् ।।**[3]

अर्थात् विमृदितव्रीहेर्विमृदिता विघर्षिता व्रीहयः कराभ्यां विमृदितव्रीहिस्तस्य करौ लक्षयित्वा तिलकालकव्रणकिणादिस्थानेष्वलक्तकरसादिनाऽङ्कयित्वा अनन्तरं सप्तश्वत्थस्य पर्णानि हस्तयोरञ्जलिकृतयोर्न्यसेत् - पत्रैरञ्जलिमापूर्य आश्वत्थैः सप्तभिः समैः इति स्मरणात् । तानि च हस्तसहितानि सूत्रेण तावद्वेष्टयेत् । कर्तुरग्न्यभिमन्त्रणाम् –

**त्वमग्ने! सर्वमूतानामन्तश्चरसि पावक!**
**साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे! मम ।।**

अर्थात् हे अग्ने! त्व सर्वभूतानां जरायुजाण्डजस्वेदजोद्भिज्जानामन्तःशरीराभ्यन्तरे चरसि उपयुक्तान्नपानादीनां पाचकत्वेन वर्त्तसे । पावक शुद्धिहेतो । कवे कान्तदर्शिन्! साक्षिवत् पुण्यपापेभ्यः सत्यं वद दर्शयेत्यर्थः । अपि च तस्य कर्तुरित्युक्तवतः "त्वमग्ने सर्वभूतानामि"त्यादिभिर्मन्त्रैरभिमन्त्रणं कृतवतो लौहं लोहविकारं

1. याज्ञवल्क्यस्मृतिः – २/१००-१०२ ।
2. याज्ञवल्क्यस्मृतिः – २/१०३।
3. याज्ञवल्क्यस्मृतिः – २/९१ ।

पिण्डं पञ्चाशत्पलिकं पञ्चाशत्पपलसम्मितं सममस्त्ररहितम् । अग्निवर्णमग्निसदृशमुभयोर्हस्तयोरश्वत्थपत्र-दधिदूर्वाद्यन्तरितयो र्न्यसेन्निक्षिपेत् । तदनन्तरं स पुरुषस्तं तप्तलोहपिण्डम् अञ्जलिना गृहित्वा सप्त मण्डलानि शनैर्व्रजेत् । एवंकारेण मण्डलेष्वेव पदन्यासं मण्डलानतिक्रमण च दर्शयति सप्तैव मण्डलानि शनैर्व्रजेदित्युक्तं, तत्रैकैकं मण्डलं किं प्रमाणकं मण्डलयोरन्तरं च कियत्प्रमाणकमित्यस्मिन् प्रसङ्गे याज्ञवल्क्येनोक्तं यत् –

**षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरम् ।**[1]

यत: प्रथमे तिष्ठति नववे क्षिपतीति न विरुद्धयते । तत: सप्तमण्डलानि गत्वा किं कुर्यादित्याकाङ्क्षायमुच्यते – अष्टमे मण्डले स्थित्वा नवममण्डले अग्नितप्तमय: पिण्डं त्वक्त्वा व्रीहीन् कराभ्यां मर्दयित्वा अदग्धहस्तश्चेच्छुद्धिमाप्नुयात् । दग्धहस्तश्चेदशुद्ध: स्यात् । यदा गच्छतोऽन्तराष्टममण्डलादर्वागेव पिण्ड: पतति दग्धादग्धत्वे वा संशयस्तदा पुनर्हरेत् ।

**उदकप्रमाणम् –**

हे वरुण! सत्येन मामभिरक्ष त्वं वरुणेत्यभिशाप्य कम् । नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत् ।। इत्यनेन मन्त्रेण कमुदकमभिशाप्याभिमन्त्र्य नाभिदघ्नोदकस्थस्य (नाभिप्रमाणोकस्थितस्य) पुरुषस्योरु गृहीत्वा शोध्यो जलं प्रविशेत् । एतच्च वरुणपूजायां सत्यां कर्तव्यम् । किञ्च कर्मैतत् नदीषु, सागरेषु देवस्थानेषु तडागेषु, सर:सु, स्थिरतोये, तृणशैवालरहिते जलौकामत्स्यवर्जिते देवखातेषु च कर्त्तव्यम् । उदके प्राङ्मुखस्थिष्ठेत् ।

तत: निमज्जनसमकालं गते तस्मिन् जविन्येकस्मिन्पुरुषे अन्यो जवी शरपातस्थानस्थित: पूर्वमुक्तमिषुमानीय जले निमग्नाङ्गं यदि पश्यति तदा स शुद्धो भवति । स्थानान्तरगमने या शुद्धि:

**विषप्रमाणम् –**

इदानीं विषप्रमाणविषये आलोच्यते । विधौ अस्मिन् मन्त्रौ –

**त्वं विष! ब्रह्मण: पुत्र: सत्यधर्मे व्यवस्थित: ।**
**त्रयस्वास्मादभिशापत्सत्येन भव मेऽमृतम् ।।**
**एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ।**
**यस्य वेगौर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् ।।**[2]

"त्वं विष" इत्यादिमन्त्रेण विषमभिमन्त्र्य कर्त्ता विषं हिमशैलजं शृङ्गभवं भक्षयेत् । तच्च भक्षितं सत् यस्य विषं वेगैर्विना जीर्यति स शुद्धो भवति । विषवेगो नाम धातोर्धात्विन्तप्राप्ति: । धातवश्च त्वगसृङ्मांसमेदोस्थि-मज्जाशुक्राणीति सप्त । एवं च सप्तैव विषवेगा भवन्ति । तेषां च लक्षणानि – "वेगो रोमाञ्चमाद्यो रचयति विषज: स्वेदवक्त्रोपशोषो तस्योर्ध्वस्तत्परौ दौ वपुषि जनयतो वर्णभेदप्रवेपौ । यो वेग: पञ्चमोऽसौ नयति विवशतां कण्ठभङ्गं च हिक्कां षष्ठो नि:श्वासमोहौ वितरति च मृतिं सप्तमो भक्षकस्य ।" अत्र महादेवस्य पूजा कर्त्तव्या । विषं देवब्राह्मणसन्निधौ दद्यात् । प्राड्विवाक: उपवासपूर्वकं महादेवं पूजयित्वा ।

1. याज्ञवल्क्यस्मृति: – २/१०६ ।
2. याज्ञवल्क्यस्मृति: – २/११०, १११ ।

एतत्कर्म कारयेत् । तथा विषे पीते यावत्करतालिकाशतपञ्चकं तावत्प्रतीक्षणीयोऽनन्तरं चिकित्सनीयः । पुनश्च भक्षिते तु यदा स्वस्थो मूर्च्छाच्छर्दिविवर्जितः निर्विकारो दिनस्यान्ते शुद्धं तमपि निर्दिशेत् ।

**कोशप्रमाणम् –**

अस्मिन् प्रसङ्गे याज्ञवल्क्येनोक्तं यत् –

**देवानुग्रान् समभ्यर्च्य तत् स्नानोदकमाहरेत् ।**
**संस्राव्य पाययेत् तस्मात् जलं तु प्रसृतित्रयम् ।।**[1]

अर्थात् उग्रान्देवान्दुर्गादित्यादीन् समभ्यर्च्य गन्धपुष्पादिभिः पूजयित्वा संस्नाप्य तन्स्नानोदकमाहरेत् । आहृत्य च "तोय! त्वं प्राणिनां प्राणः" इत्यादिना तत्तोयं प्राड्विवाकः संस्राव्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा "सत्येन मामभिरक्ष त्वं वरुणः" इत्यनेनाभिमन्त्रितं प्रसृतित्रयं पाययेत् । एतदेव पूर्वाहतदे सोपवासस्य स्नातस्यार्द्रपटस्य च । सशूकस्य व्यसनिनः कोशपानं विधीयते ।" चतुर्दशादह्नः पूर्वं यस्य राजनिमित्तं दैविकं देवप्रभवं व्यसनं घोरं नैव जायते अल्पस्य देहिनामपरिहार्यत्वात् स शुद्धो वेदितव्यः ।

मया याज्ञवल्क्यमतानुसारं प्रमाणं विषये आलोचना जाता । प्रमाणं विना व्यवहाराः भवितुं न शक्यते । अतः यत्र वादीप्रतिवादिनोभयो विवाद भवति तत्र प्रमाणम् अपेक्ष्यते । अतः अस्मिन् समाजे प्रमाणस्य आवश्यकता विद्यते । इत्यलम् ।

— o —

**सन्दर्भाः –**

१. कात्यायस्मृतिः – गायकवाड, ओरियण्टाल् सिरिज्, वडोदरा, गुजराट ।

२. नारदस्मृतिः – सं.-डॉ.व्रजकिशोरस्वाईं, चौखम्बासंस्कृतप्रतिष्ठान, वाराणसी, चतुर्थसंस्करणम् ।

३. मनुस्मृतिः – चौखम्बासंस्कृतसंस्थान, वाराणसी, १९८२ ।

४. याज्ञवल्क्यस्मृतिः – निर्णयसागरप्रेस्, मुम्बई, १९७४ ।

५. धर्मशास्त्रेतिहासः – सं-प्रो.जयकृष्णमिश्रः, चौखम्बाप्रकाशन, वाराणसी ।

६. याज्ञवल्क्यस्मृतिः – सं-डॉ.गङ्गासागरराय, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, २००७ ।

— o —

**Mob.: 7978536396**
**Email : dr.anilkumardash@gmail.com**

1. याज्ञवल्क्यस्मृतिः – २/११२ ।

# वैदिक वाङ्मय में जल संरक्षण की संकल्पना

## (आपः सूक्त के संदर्भ में)

डॉ. अशोक कँवर शेखावत
सहायक आचार्य – संस्कृत विभाग
राजकीय स्नातकोत्तर महाविद्यालय,
झालावाड़ (राज.)

सारांश

वैश्विक धरातल पर वेद भारत की विश्व को देन है। वेदों में क्रान्तदर्शी ऋषियों की अन्तर्दृष्टि से प्राप्त सृष्टि के नियामक सिद्धान्त निहित है, जिनको आधुनिक विज्ञान भी प्रमाणित करता है। वैदिक ऋषि कहता है– ''सोम सूर्यात्मकं जगत्'' अर्थात् सृष्टि का निर्माण सोम एवं सूर्य के सहयोग से हुआ है। इसी तथ्य को भौतिक विज्ञान सिद्ध करता है कि सृष्टि जल एवं अग्नि से उत्पन्न है। ऊर्जा की उत्पत्ति जल एवं अग्नि के बिना संभव ही नहीं है। सम्पूर्ण वैदिक वाङ्मय सृष्टि की सम्पूर्ण दिव्य शक्तियों की श्रृंखला का साक्षात्कार करता है, वैदिक वाङ्मय के गूढ़ अवगाहन से यह बात सिद्ध हो जाती है कि 'ऋषयः मन्त्रद्रष्टारः न तु कर्तारः'। उन्होंने मन्त्रों का अर्थात् सुरक्षा के गूढ़ रहस्यों का दर्शन किया और उसी को दिव्य वाणी में प्रकट किया।

. ऋषियों द्वारा प्रतिपादित जलसंरक्षण की मनोवैज्ञानिक अवधारणा को मंत्रों में निहित अर्थों की व्याख्या करते हुए इस शोध पत्र में सिद्ध किया गया है कि पंच तत्वों में आधारभूत मूलतत्व, जल की दिव्यशक्ति के रूप में पूज्यता, वरेण्यता एवं संरक्षणीयता की भावभूमि ही जल संरक्षण की आधारशिला है।

मुख्य शब्द : आपः, विश्वेदेवा, अप्रकेतम्, सर्वबीजप्रकृतिः, भेषजम्, नरसूनवः, शतपवित्रा, स्वधया, संरिहाणे, खनित्रिमा, अरम्णात्, मयोभुवः, क्षमन्ती, चर्षणीनाम्, वार्याणाम्, आकूतिः, मिनक्षसि, सुभगाम्, पयसेव, अर्षन्ति, बिपाशम्, वार्षिकी, चक्षसे, अमूर्या, हिन्वन्त्वध्वरम्, स्योना।

साहित्य जनमंगल का साधक है। जनमंगल रूपी साध्य के साधक कवि की सृष्टि का अभिनंदन करते हुए काव्य प्रकाशकार कहते हैं–

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्राम्।
नवरसरूचिरां निर्मितिमादधती भारती कवेर्जयति।।[1]

वैदिक वाङ्मय संभवतः विश्ववाङ्मय में प्राचीनतम साहित्यसर्जन है। ज्ञान के प्रथम अवतरण की भूमि पर धर्म, दर्शन, विज्ञान, अध्यात्म एवं काव्यत्व की अपार निधि स्वरूपा वैदिक साहित्य सर्जना का एक मात्र लक्ष्य इस सृष्टि के रहस्यात्मक दिव्यत्व की थाह पाना एवं मानव कल्याण का पथप्रशस्त करना ही सिद्ध होता है। वैदिक मंत्रदृष्टा ऋषि व्यक्त एवं अव्यक्त दोनों सृष्टियों की मंगलकामना करता है। वैदिक सूक्तों की प्रार्थनाएँ इसका प्रत्यक्ष प्रमाण है। ऋषि कामना करता है–

ऊँ द्यौः शान्तिरन्तरिक्ष शान्तिः पृथ्वी शान्तिरापः शान्तिरोषधयश्शान्तिर्वनस्पतयश्शान्ति– र्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः। शान्तिरेव शान्तिः सा मा शान्तिरेधि। (वैदिक शांति मंत्र)।[2]

पा×चभौतिक त्रिगुणात्मिका जड़–चेतन सृष्टि के संतुलन को वैदिक वाङ्मय ने जीवनधर्म मानकर आत्मसात करने का आदेश दिया है। वैदिक वाङ्मय में प्रस्फुटित ऋचाएँ एवं यज्ञविधान वस्तुतः पूरा का पूरा पर्यावरण विज्ञान ही है। वैदिक साहित्य में पा×चभौतिक जगत, प्राणी जगत एवं वनस्पति जगत को सापेक्ष रूप से पर्यावरण के रूप में स्वीकार किया गया है। चराचर जगत में विद्यमान प्रत्येक आधारभूत उपादान उस परमसत्ता का अंश है और वो इस सम्पूर्ण सृष्टि के संचालन के लिए ही है। हम प्रकृति से पोषण प्राप्त करें, इसका उपयोग करें, साथ ही हम भी प्रकृति का पोषण करें। उपनिषदों में त्यागपूर्वक उपभोग का आदेश दिया गया है–

ईशावास्यमिदं सर्वं यत्कि×च जगत्या जगत्।
तेन त्यक्तेन भु×जीथा मा गृध कस्यस्विद्धनम्।।[3]

अर्थात् यह सम्पूर्ण संसार ईश द्वारा व्याप्त है, त्यागपूर्वक भोग करना चाहिए, आवश्यकता से अधिक धन का लालच नहीं करना चाहिए।

इस एक मंत्र ने प्रकृति के उपभोग का आदर्श स्थापित कर दिया है। ईश्वर द्वारा व्याप्त होने से यह आदरणीय है, विनम्रता से ग्रहणीय है तथा लालच वर्जित है। यह दृष्टिकोण पर्यावरण सरंक्षण का सुन्दर पाथेय है।

वस्तुतः सम्पूर्ण वैदिक वाङ्मय क्रान्तदर्शी ऋषियों की प्रज्ञाचक्षु द्वारा किया गया सत्य का साक्षात्कार ही है। समय एवं स्थान की सीमाओं से परे जीवनरक्षा के सूत्रों का ज्ञानरूपी दृष्टि से अवलोकन एवं जनकल्याण हेतु सृष्टि का मार्ग दर्शन यही 'वैदिक वाङ्मय' का मूलमन्त्र है। जब हम कहते हैं, वेद अपौरुषेय है तब तात्पर्य है कि वेद (ज्ञान, सत्य, यथार्थ), पराचेतना के गर्भ में सदा–सदा के लिए विद्यमान रहते हैं। चेतना के परम परिष्कृत स्तर पर क्रान्तदर्शी व्यक्तित्व उसका दर्शन, साक्षात्कार, अनुभव कर पाते हैं। प्रत्येक युग में ज्ञान का प्राकट्य एवं युगान्त में ज्ञान का विलय यही क्रम है। अतएव वेद अपौरुषेय है।

आपः तत्त्व अथवा जल तत्त्व सृष्टि से पूर्व भी, सृष्टि के निर्माण में भी और सृष्टि के पश्चात् भी विद्यमान है। इसी सत्य की ओर संकेत करते हुए नासदीय सूक्त में कहा गया है कि प्रलयावस्था में यह जगत् तमस रूप मूल कारण में विद्यमान था। यह अज्ञात जगत सलिल अर्थात् जल रूप में था। कारण और कार्य एकाकार थे–

''तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदं।

तुच्छ्येनाभ्यवपिहितं तदासीत्तपसस्तन्महिनाजायतैकं।।[4]

यही आपः (आप्+क्विप्+हस्वश्च से बहुवचन में निर्मित) तत्त्व ही पांचभौतिक सृष्टि के पांच तत्त्वों में प्रथम है। इसका संकेत मनुस्मृतिकार इस प्रकार करते है–

"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु बीजमवसृजत्।।"[5]

अर्थात् प्रजासर्जन की कामना से उस सर्वशक्तिमान ने अपने शरीर से सर्वप्रथम जल को उत्पन्न किया और उस जल में शक्ति रूप बीज को डाला।

स्पष्ट है कि संसार का स्वरूप जल में निहित है, संसार का अस्तित्व जल में निहित है। यह आपः तत्त्व उस नर रूप परमात्मा से उत्पन्न होने के कारण 'नार' कहलाता है और उस नार (जल) में वास होने से ही यह नारायण है। मनु कहते है–

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः।।[6]

उस जल में स्थापित शक्ति रूप बीज (स्वर्णमय अण्ड) में वर्षपर्यन्त रहकर उस परमशक्ति ने स्वयं उस स्वर्णमय अण्ड के दो भाग किए, जो स्वर्ग एवं पृथ्वी कहलाये और इन दोनों के बीच 'आकाश', दिशाएं तथा इस आपः तत्त्व का स्थायी स्थान समुद्र को बनाया। कहा गया है–

ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे।
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम्।।[7]

जलस्थानों में समुद्र के सर्वश्रेष्ठ होने का संकेत आपः सूक्त में भी किया गया है–

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः।
इन्द्रो या वज्री वृषभोरराद ता आपो देवीरिह मामवतु।।[8]

सृष्टिसर्जन की जो भी सर्वव्यापी बीजरूप शक्ति है, उसने जल को ही सर्वप्रथम बनाया, इसको महाकवि कालिदास भी स्वीकृति प्रदान करते है, जब वो अभिज्ञानशाकुन्तल में अष्टमूर्ति परमात्मा से रक्षा की प्रार्थना करते हुए जल को (सृष्टुः आद्या सृष्टिः) के रूप में प्रथम सृष्टि के रूप में परिगणित करते हैं–

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री।
ये द्वे कालं विधत्तः श्रुतिविषयगुणा याः स्थिता व्याप्य विश्वम्।।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नः तनुभिरवतु वस्ताभिरष्टाभिरीशः।।[9]

मानवजीवन के अस्तित्त्व का मूल तत्त्व जल ही है, उस जीवन का संचालक भी जल ही है। अतः उस जल का अपने मूल स्वरूप में बने रहना अपरिहार्य है। आज बड़े–बड़े वैज्ञानिक, शोधकर्ता एवं आहार विशेषज्ञ इस तथ्य को स्वीकार कर चुके हैं कि जल ही अधिकांश रोगों का उपाय है। शरीर में जल की मात्रा को पर्याप्त रूप में बनाए रखना और उस जल की शुद्धता को भी बनाये रखना मानवसभ्यता के सरंक्षण के लिए अनिवार्य है। जल अमृत है, जल औषधि है, जल सुखदायक अग्नितत्त्व का धारक है, जल स्वास्थ्य का संरक्षक है, जल नीरोग रहने का आधार है, जल वर्चस्व प्रदान करने वाला है। आपःसूक्त इन सभी सत्यों को अनावृत्त करता है–

अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये।
देवा भवत वाजिनः।।[10]
अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।
अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः।।[11]

इस जलसमूह रूपी औषधि से ही वैदिक ऋषि प्रार्थना करते हैं कि वे हमारे शरीर में स्थिर रहे। ये जलसमूह अपने भीतर निहित औषधियों को हमारे शरीर में स्थिर करे, जिससे हम दीर्घायु एवं स्वस्थ रहकर सूर्य के दर्शन करते रहें।

आपः पृणीत भेषजं वरुथ तन्वे ३ मम।
ज्योक् च सूर्यं दृशे।।[12]

सब प्रकार से पवित्र जल हमारे शरीर को पवित्रता, तुष्टि एवं आनन्द प्रदान करते हैं। ऋषि यह भी संकेत करते हैं कि जल आए, परन्तु विघ्न उत्पन्न न करे तथा नदियां अपने सौम्य रूप में प्रवाहित होती रहे। वैदिक ऋषियों की कल्याणकारी कामनाएँ द्रष्टव्य है–

शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत।।[13]

जल तत्त्व सृष्टि का आधारभूत तत्त्व है। अतः यदि सृष्टि को अपने मूल एवं स्वस्थ स्वरूप में बनाये रखना है तो जल के महत्त्व को समझते हुए उसका सम्मान करना चाहिए और उसकी सुरक्षा करनी चाहिए। समस्त चराचरजगत् की अन्योन्याश्रित शृंखला को अविच्छिन्न बनाये रखने का वैदिक ऋषियों का एक अभूतपूर्व दर्शन है। वैदिक वैज्ञानिकों ने मानवमनोविज्ञान को गहन रूप से हृदयंगम करते हुए पर्यावरण सुरक्षा के दृष्टिकोण से करणीय कार्यों को योजनाबद्ध रूप में धर्म एवं दिनचर्या के अपरिहार्य अंग के रूप में मानवजीवन में प्रतिष्ठापित किया तथा सृष्टि की सम्पूर्ण शृंखला को क्षति पहुंचाने योग्य अकरणीय कार्यों को पातक के रूप में दण्डनीय एवं नारकीय घोषित कर भय के मनोविज्ञान के द्वारा प्रकृति को सुरक्षित किया। इसी क्रम में आप सूक्त आपः तत्त्व (जल तत्त्व) के स्वरूप, महत्ता एवं वैशिष्टय को प्रकट करते हुए इस प्रकार के आचरण का उपदेश करता है जिससे जल का हम सम्मान करें, उसकी महत्ता को समझे तथा हमारी तथा आने वाली पीढ़ियों का कल्याण करें।

जल मातृसदृश है। जिस प्रकार माता गर्भ में तथा आत्मनिर्भर होने तक हमारा पालन पोषण करती है, ये जलप्रवाह भी मातृवत पुष्टिप्रदाता है–

अम्बयो यन्त्यध्वभिर्जययो अध्वरीयताम्।
पृ×चतीर्मधुना पयः।।[14]

अन्तरिक्षीय जल वस्तुत जीवन ही है। वर्षा जो विज्ञान संगत तरीके से भी हम जानते है कि सूर्यकिरणों के द्वारा अवशोषित जलकणों का ही पुनः प्रतिकार है। उसी अन्तरिक्षीय जल की आराधना करते हुए कहा गया है–

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह।
ता नो हिन्वन्त्वध्वरम्।।[15]

निस्सन्देह शोधसम्मत, तर्कसंगत, विज्ञानसम्मत, मनोविज्ञानसम्मत एवं अध्यात्मसम्मत वैदिक ऋषियों के सत्य के साक्षात्कार स्वरूपा ऋचाएँ जल के स्त्रोत, जल के स्वरूप, जल की महत्ता, जल के संरक्षण, जल के संवर्धन एवं जल के सम्मानीय स्थान को दृढ़ता के साथ प्रतिपादित करती है। उसके अनुसार जल अंतरिक्ष से आता है पौराणिक आख्यानों के अनुसार वृत्रासुर से मुक्त कर इन्द्र ने वर्षा को प्रवाहित किया। आपः सूक्त भी संकेतित करता है कि इन्द्र के द्वारा प्रशस्त किए गए मार्ग वाले तथा समुद्र में स्थायी रूप से रहने वाले जल देव हमारी रक्षा करें। आपः सूक्त यह प्रतिपादित करता है कि जल अन्तरिक्ष से पृथ्वी पर आता है तथा पृथ्वी के जिस भी स्रोत से जल अस्तित्व में आए परन्तु वह समुद्र में ही अन्ततोगला स्थायी रूप से निवास करता है। ऋषि कहते हैं–

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वय×जा।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवतु।।[16]

मरुत देवता की सहायता से वज्रधारी इन्द्र ही पर्वतों को नष्ट कर जलस्रोत प्रवाहित करता है इसका संकेत इन्द्रसूक्त भी देता है जहां कहा गया है कि–

यः पृथिवीं व्यथमानामदृहद् यः पर्वतान् प्रकुपितां अरम्णात्।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तम्भ्नात् स जनास इन्द्रः।।[17]

इस पंचभूतात्मक जड़चेतन संसार में जल तत्त्व प्रमुख है तथा सबसे पहले रचा गया तथा इस भौतिक सृष्टि के प्रलयोपरान्त भी वही जल तत्त्व विद्यमान रहने वाला है। शरीर में तीन चौथाई अंश जल में है सृष्टि का भी तीन चौथाई दंश जलमय है और इस जलमय सृष्टि में भी अग्नि तत्त्व, सोम तत्त्व विराजमान है। अतः यह जल तत्त्व न केवल स्वास्थ्य, संतुलन एवं प्राण प्रदान करता है अपितु ऊर्जा एवं आनन्द भी प्रदान करता है। इस जल में वरुण/आदित्य निवास करते है जो इसके राजा हैं, अर्थात् जल के देवता हैं। वरुण को समुद्र का अधिष्ठाता देवता वैदिक वाङमय में स्वीकार किया गया है। रसयुक्ता दीप्तिमती एवं शोधिका (शुद्ध करने वाली) जलदेवियों से प्रार्थना करते हुए आपः सूक्त कहता है कि–

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्म×जनानाम्।
मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु।।[18]

सोम एवं विश्वव्यवस्थापक अग्निदेव भी जल में ही निवास करते हैं–

यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदन्ति।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु।।[19]

वैदिक ऋषियों ने प्रकृति की समस्त दिव्य शक्तियों को देवत्व प्रदान कर उन्हें पूज्य स्वरूप प्रदान किया है। उनके प्रति प्रार्थना का भाव समारोपित किया है। ये प्रार्थनाएँ वस्तुतः हमारे शुभ संकल्प हैं, स्वयं की स्वयं से की गई प्रतिज्ञा है। वैदिक ऋषि सदैव प्राकृतिक दिव्य शक्तियों से प्रार्थना करता है कि वे सभी दिव्यशक्तियां अपने कल्याणकारी स्वरूप में बनी रहे मानवसभ्यता पर अपनी कृपा बनाये रखे। ये प्रार्थनाएँ सकारात्मक वैचारिक तरंगे हैं जो हमें स्वयं को तथा परिवेश को सकारात्मक संकल्पों से सम्पूरित कर देती है। यही कारण है कि ऋषि समुद्र की आराधना करता है, नदियों की आराधना करता है, कूप एवं वापी पूजन का विधान करता है, इन्द्र की स्तुति करता है, वरुण की स्तुति करता है। हमारे लिए नदियां पूज्य है उन्हें हम मां के स्वरूप में पूजते है। विश्वामित्र–नदी संवाद में विश्वामित्र बिपाशा (व्यास) एवं शुतुद्रि (सतलज) नदियों को स्नेहसिक्त मातृतुल्य बताते हुए कहते हैं–

अच्छा सिन्धुं मातृमामयासं बिपाशमुर्वी सुभगामगन्म।
वत्समिव मातरा संरिहाणे समानं योनिमनु संचरन्ती।।[20]

ये नदियां ही भूमिसिंचन में पृथ्वी की उपकारिका है। ऋग्वेद में समस्त जलस्रोतों का स्तुत्य रूप में वर्णन है। सिन्धु का मुख्य नदी एवं गंगा, यमुना, सरस्वती, वितस्ता, शुतुद्रि, गोमती आदि नदियों का ऋग्वेद में उल्लेख मिलता है। सिन्धु से वैदिक ऋषि प्रार्थना करता है–

अभि त्वा सिन्धो शिशुमिन्न मातरो वाश्रा अर्षन्ति पयसेव धेनवः।
राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि।।[21]

जलस्रोत जीवनस्रोत है अतएव स्तुत्य है, पूज्य है एवं संरक्ष्य है। वैदिक वाङ्मय जितना प्रासंगिक तत्कालीन समाज के लिए था उतना ही प्रासंगिक अधुनातन समाज के लिए भी है। आज भी समस्त जलस्रोत संरक्ष्य है। वही रक्षा एवं स्तुति का भाव जाग्रत करने की आज महती आवश्यकता है।

सामूहिक संकल्प की महत्ता को प्रतिपादित करते हुए ऋषि कहते हैं–

समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति।।[22]

स्पष्ट है कि वैदिक वाङ्मय में क्रान्तदर्शी ऋषियों ने सृष्टि के निर्माण, संचालन, प्रलय एवं पुनर्निर्माण सबमें जल की स्थिति को स्वीकार किया गया है। जल जीवनी शक्ति है। वह जीवन का ही पर्याय है। अतः उसकी सुरक्षा हम सभी धरती पुत्रों का महान् दायित्व है। आइए हम सब प्रार्थना करे कि यह जल हमारे लिए शांतिकरक और आनंददायक हो। यह हमारे लिए कल्याणकारी व अनुकूल हो।

शं नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभि स्रवन्तु नः।।[23]
शं न आपो धन्वन्याः ३ शमु सन्तवनूप्याः
शं न खनित्रिमा आपः शमु याः कुम्भ आमृताः
शिवा नः सन्तु वार्षिकीः।।[24]

पर्यावरण और विशेषतया जल के जीवनाधारक अमृतमय गुणों के सत्य का साक्षात्कार करने वाले वैदिक ऋषि जल के देवत्व को स्वीकार करते हैं, उसकी पूजा करते हैं उसकी पवित्रता की रक्षा करते हैं और इस दिव्य शक्ति रूप आपः देवता से जनमंगल की प्रार्थनाएँ करते है। वैदिक आपः सूक्त यह प्रतिपादित करता है कि जल जीवन का आधार है, दिव्य है, अलौकिक है, असाधारण है, देवता है, परमात्मा का ही स्वरूप है। जबकि 'अपां भेषज सूक्त' यह प्रतिपादित करता है कि जीवनी शक्ति में, ऊर्जा में, स्वास्थ्य में यहाँ तक की मानसिक एवं भावनात्मक स्वास्थ्य में भी जल तत्त्व पुनः श्रेष्ठता का स्तर सम्पादित करने में समर्थ है। जल जीवन व स्वास्थ्य प्रदान करता है तथा विसंगति होने पर जल ही पुनः उसको स्वास्थ्य में परिणमित करता है। इस रहस्य को जानने वाला वैदिक ऋषि आपः देवता से स्तुति करता है–

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।

महे रणाय चक्षसे।।[25]

जल को व्याधिनिवारक घोषित करते हुए ऋषि कहता है–

ईशानां वार्याणां क्षयन्तीश्चर्षणीनाम्।
अपो याचामि भेषजम्।।[26]

ऋषि इस सत्य से परिचित है कि ब्रह्माण्ड की समस्त दिव्य शक्तियां अग्निगर्भा जल के सारभूत सोम तत्त्व का सेवन करती है, इसीलिए वे दिव्य हैं और इसीलिए ऋषि जल के अधिष्ठाता देवता से कल्याणकारी, शुद्ध एवं पवित्र जल प्रदान करने की प्रार्थना करता है–

शिवेन मा चक्षुषा पश्यतापः
शिवया तन्वोप स्पृशत त्वचं मे।
घृतश्चुतः शुचयो याः पावकास्ता,
न आपः शं स्योना भवन्तु।।[27]

मन्त्र दृष्टा ऋषि इस तथ्य से परिचित है कि सूर्य के सम्पर्क में आया हुआ वाष्पीकृत जल सूर्य की शक्ति के साथ ही वर्षा के रूप में हमारे लिए उन्नति कारक हो सकता है, हमारा कल्याण कर सकता है हमारे लौकिक लक्ष्यों की प्राप्ति में साफल्य प्रदान कर सकता है। इसी कारण वह प्रार्थना करता है–

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह।
तानो हिन्वन्त्वधरम्।।[28]

अस्तु सम्पूर्ण साहित्य सुधी समाज से अनुरोध है कि समस्त पूर्वाग्रहों से मुक्त होकर वैदिक वाङ्मय का अवगाहन करें। निश्चय ही पर्यावरण संतुलन विशिष्ट रूप से जल संतुलन की राह में हमें कोई मार्गदर्शन, कोई रास्ता, कोई दृष्टिकोण दिखाई देगा जिस पर चलकर हम जल रूपी जीवन के गरिमामय अस्तित्व को सुरक्षित कर पाएंगे। इसी कामना के साथ–

ऊँ शं नो मित्रः शं वरुणः। शं नो भवत्र्यमा। शं नः इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम। अवतु वक्तारम्। ऊँ शान्ति शान्तिः शान्तिः। (वैदिक शांति मंत्र)।[29]

---

संदर्भ

1. आचार्य मम्मट, काव्यप्रकाश, 1.1
2. यजुर्वेद, 36.17
3. ईशावास्योनिषद, 1
4. ऋग्वेद, 10.129.3
5. मनुस्मृति, 1.8
6. मनुस्मृति, 1.10
7. मनुस्मृति, (संभवतः प्रक्षिप्त), 1.13
8. ऋग्वेद, 7.49.8
9. कालीदास, कालीदास, अभिज्ञानशाकुन्तलम्, 1.1
10. ऋग्वेद, 1.23.19

11. ऋग्वेद 1.23.20
12. ऋग्वेद, 1.23.21
13. ऋग्वेद, 7.47.3
14. ऋग्वेद 1.23.16
15. ऋग्वेद, 1.23.17
16. ऋग्वेद, 7.49.2
17. ऋग्वेद, 2.12.2
18. ऋग्वेद, 7.49.3
19. ऋग्वेद, 7.49.4
20. ऋग्वेद, 3.33.3
21. ऋग्वेद, 10.75.4
22. ऋग्वेद, 10.191.4
23. अथर्ववेद, 1.6.1
24. अथर्ववेद, 1.6.4
25. अथर्ववेद, 1.5.1
26. अथर्ववेद, 1.5.4
27. अथर्ववेद, 1.33.4
28. अथर्ववेद. 1.4.2
29. यजुर्वेद, 36.9

## संदर्भ ग्रन्थ सूची


1. ऋग्वेद, अपौरुषेय, स्वाध्याय मंडल, पारडी, सं. 1967, 70, 78 (3 भाग क्रमशः)
2. यजुर्वेद, अपौरुषेय, संस्कृति संस्थान, बरेली, सं. तृतीय 1965
3. सामवेद, अपौरुषेय, संस्कृति संस्थान, सं. तृतीय 1965
4. अथर्ववेद संहिता, अपौरुषेय, युग निर्माण योजना विस्तार ट्रस्ट, गायत्री तपोभमि, मथुरा, 2010
5. आचार्य मम्मट, काव्यप्रकाश, आचार्य विश्वेश्वर, ज्ञानमण्डल लि., वाराणसी, प्र.सं. 2031
6. पण्डित रामेश्वर भट्ट, मनुस्मृति, चौखम्बा संस्कृत प्रतिष्ठान, 38 यू.ए., जवाहरनगर, नई दिल्ली, 2001
7. डॉ. रूपनारायण त्रिपाठी, भारतीय संस्कृति के मूल तत्त्व, पंचशील प्रकाशन, जयपुर, 2013
8. डॉ. राममूर्ति शर्मा, वैदिक साहित्य का इतिहास, ईस्टर्न बुक लिंकर्स, नई दिल्ली, 1987
9. कालिदास, अभिज्ञानशाकुन्तलम्, डॉ. प्रभाकर शास्त्री, डॉ. रूपनारायण त्रिपाठी, पंचशील प्रकाशन, जयपुर, 2003
10. अथर्ववेद–संहिता, अपौरुषेय, ब्रह्मवर्चस, शांति कुंज, हरिद्वार, उत्तरप्रदेश, 1995
11. ऋग्वेद संहिता, अपौरुषेय, भाग–1, 2, 3, 4, युगनिर्माण योजना विस्तार ट्रस्ट गायत्री तपोभूमि, मथुरा, 2010
12. यजुर्वेद संहिता, अपौरुषेय, संस्कृति संस्थान, बरेली, सं. तृतीय 1965
13. सामवेद, अपौरुषेय, संस्कृति संस्थान, सं. तृतीय 1965
14. ईशादि नौ उपनिषद्, गीता प्रेस, गोरखपुर, संवत् 2069
15. रामचन्द्र दत्तात्रेय रानाडे, उपनिषद् दर्शन का रचनात्मक सर्वेक्षण, राजस्थान हिन्दी ग्रंथ अकादमी, जयपुर, 2011
16. डॉ. कृष्णा कांत पाठक, धर्म–दर्शन, राजस्थान हिन्दी ग्रंथ अकादमी, जयपुर, 2011
17. एस.एन. दासगुप्त, भारतीय दर्शन का इतिहास, राजस्थान हिन्दी ग्रंथ अकादमी, भाग–1, जयपुर, 2011
18. एस.एन. दासगुप्त, भारतीय दर्शन का इतिहास, राजस्थान हिन्दी ग्रंथ अकादमी, भाग–2, जयपुर, 2011
19. एस.एन. दासगुप्त, भारतीय दर्शन का इतिहास, राजस्थान हिन्दी ग्रंथ अकादमी, भाग–3, जयपुर, 2012
20. एस.एन. दासगुप्त, भारतीय दर्शन का इतिहास, राजस्थान हिन्दी ग्रंथ अकादमी, भाग–4 व 5, जयपुर, 2012

# ।। काव्यगुणविमर्शः ।।

डा. देवाशिषत्रिपाठी

## ❖ प्रबन्धसारः

काव्यशास्त्रस्य जीवनाधायकरससगुणान्नलङ्कारादीनां समस्ततत्त्वानां निरूपणमस्मिन्नेव भवति। रसगुणादीनां काव्ये व्यवहारप्रयोजकत्वं काव्यवृत्तेस्तदाश्रयात् इति ग्रन्थेन ध्वनिकारोक्तं पञ्चमोल्लासे मम्मटभट्टेन प्रतिपादितम्। रसगुणादिकृतचारुत्वेनैव शब्दार्थाभ्यां काव्यत्वनिर्वाहादिति भावः। काव्यशास्त्रमिति।

काव्यगतसमस्ततत्त्वानामालोचनात्मकं शास्त्रम् अलङ्कारशास्त्रम्। संस्कृतसाहित्ये अलङ्कारशास्त्रस्य ऐतिह्यं गौरवमयमासीत्। वेद-पुराण-दर्शनादिशास्त्रादिवत् अलङ्कारशास्त्रस्य प्राचीनता गवेषकैः संकलिता। यस्मात् दिनादारभ्य भारतीयाः कवित्वशक्त्या अनुप्राणिता आसन् तस्मादेव दिनात् अलङ्कारशास्त्रस्यैव उत्पत्तिरभूत् इति निश्चप्रचं वक्तुं शक्यते।

एकादशशतकोद्भवः राजशेखरः तदीयकाव्यमीमांसाग्रन्थे शिक्षा-कल्प-निरूक्तमन्तरेण अलङ्कारशास्त्रस्यापि महत्वं प्रत्यपादि । भरतमुनिः नाट्यशास्त्रे वक्ति यथा – कर्मभावान्वयापेक्षी नाट्यवेदो मया कृतः।[i]

काव्यमीमांसाकारः तु साक्षात् वक्ति यथा –

**उपकारकत्वात् अलङ्कारः सप्तमम् अङ्गम्।**

यथा अस्माभिः ज्ञायते भाषायां व्युत्पत्तिवर्द्धनाय व्याकरणशास्त्रावश्यकता वर्तते, तथैव काव्ये नैपुण्याय अलङ्कारशास्त्रमपि। अलङ्कारशास्त्रं विना केवलं काव्ये नैपुण्यमेव न सम्पद्यते अपितु वाक्यदोषदृष्टिरपि नोत्पद्यते। यः खलु अलङ्कारशास्त्रज्ञानरहितो व्याकरणादिकं जानन्नपि –

**चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे,**

**एवञ्च गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः।।**[ii]

## ❖ भूमिका

यस्मिन् खल्ववगते स्वरूप-दोष-गुणालङ्कारादीनां चावधारणे काव्यस्य निर्माणे शक्तिरुदेति तदलङ्कारशास्त्रम्। अलङ्कारशास्त्रे ज्ञानविहीनो जनः व्यङ्ग-व्यञ्जकगतं रहस्यं ज्ञातुं न शक्नोति। नवमशतकोद्भवः आनन्दवर्द्धनः स्पष्टरूपेण निगदति –

**शब्दार्थशासनज्ञानमात्रेणैव न विद्यते।**

**वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्।।**[iii]

## ❖ गुणविमर्शः –

काव्यस्य निर्माणे स्वरूपदोषगुणालङ्कारादिनामवधारणे च शक्तिरुन्मिषति तदलङ्कारशास्त्रम्। शब्देन सह तादात्म्ये सति शब्दस्य परब्रह्मभूतेनार्थेन सहापि तादात्म्यं भवितुं शक्नोति, एतस्मात् काव्यशास्त्रस्य ज्ञानं ग्राह्यमस्ति ब्रह्मास्वादसहोदरस्य परमपदलाभस्य साधनभूतमिदं काव्यशास्त्रम्। तस्य अध्ययनमतोऽवश्यमेव कर्त्तव्यम्।

आचार्यभरतस्य नाट्यशास्त्रे गुणानां दश भेदान् पर्यवसति – सप्तदश अध्याये

श्लेषः प्रसाद समता समाधिमाधुर्यमोजः पदसौकुमार्यम्।

अर्थस्य चाव्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते॥[iv]

भरतादनन्तरं भामहाचार्येण माधूर्योजप्रसादाख्यानां गुणत्रयाणां वर्णनं कृतम्। काव्यालङ्कारस्य द्वितीये परिच्छेदे अलङ्कारविवेचनात् प्रागेव निगदति –

**माधुर्यमभिवाञ्छतः.... प्रसादञ्च सुमेधसः.....**

**केचिदोजोभिधित्सन्तः.......**[v]

अनन्तरं दण्डिनो मतम् – काव्यादर्शस्य प्रथमपरिच्छेदे (काव्यस्वरूपात्मके खण्डे) काव्यगतान् दश गुणान् स्मरति।

**श्लेष प्रसाद समता माधुर्यसुकुमारता।**

**अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः।**[vi]

**इति वैदर्भमार्गस्य प्राणाः दश गुणाः स्मृताः।**

**एषां विपर्ययः प्रायो दृश्यते काव्यवर्त्मनि॥ इति**

अग्निपुराणे – शब्द अर्थ उभयरूपवर्गेषु विभक्ताः गुणाः सन्ति। शब्दगुणवर्गे – यौगिकी सती उदारता सौकुमार्य गाम्भीर्य लालित्य श्लेषान्ताः सप्त शब्दगुणाः सन्ति।

अर्थगुणवर्गे माधुर्य कोमलत्व उदारता प्रौढि सामयिकत्व संविधानान्ता षड् गुणाः।

उभयगुणवर्गे प्रसाद सौभाग्य यथासंख्य उदारता पाक रागान्ताः षड्गुणाः। गुणविषये अग्निपुराणस्य वचनम् –

**यः काव्ये महतीं छायामनुगृह्णात्यसौ गुणः।**[vii] **इति**

**भोजराजमते चतुर्विंशति गुणाः सन्ति।**

**कुन्तकाचार्यस्य मते – काव्यस्य त्रयो मार्गाः सन्ति।**[viii]

**सुकुमार – विचित्र – मध्यमारूपाः।**

**त्रयाणां मार्गाणां दौ प्रकारकौ गुणौ स्तः – साधारण – विशिष्टौ च।**

**औचित्य – सौभाग्याख्यौ द्वौ साधारणगुणौ।**

**माधुर्य – प्रसाद – लावण्य – आभिजात्यादयः चत्वारः गुणाः विशिष्टाः सन्ति।**

आचार्यवामनमतम् –

**काव्यशोभायाः कर्तारो धर्मा गुणाः**

**तदतिशयहेतवस्त्वलङ्काराः॥**

काव्यसौन्दर्यसाधकाः सुन्दरं काव्यव्यवहारस्य साधका वा गुणा इति गुणलक्षणम् अस्ति।[ix]

शब्दगुणाः – गाढ़बन्धत्वमोजः[x], शैथिल्यं प्रसादः, मसृणत्वं श्लेषः मार्गभेदः समता आरोहावरोहक्रमः समाधिः, पृथक्पदत्वं माधुर्यम्, अजत्वं सौकुमार्यम्, विकटत्वमुदारता, अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः, औज्जल्यं समाधिः।

अर्थगुणाः – अर्थस्य प्रौढ़िरोजः[xi], अर्थवैमल्यं प्रसादः, घटना श्लेषः, अवैषम्यं समता, अर्थिदृष्टिः समाधिः[xii], उक्तिवैचित्र्यं माधुर्यम्, अपारूष्यं सौकुमार्यम्, अग्राम्यत्वमुदारता, वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः, दीप्तरसत्वं कान्तिः।

काव्यालङ्कारसूत्रवृत्तौ तृतीये अधिकरणे इयं चर्चा भवति।[xiii]

ध्वन्यालोककारः आनन्दवर्द्धनः गुणं रसस्य धर्मरूपेण निगदति – तद्यथा –

तमर्थवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।

अङ्गाश्रितास्त्वलङ्कारा मन्तव्या कटकादिवत्॥[xiv]

आचार्यमम्मटः – वामनस्य गुणान् सर्वान् नाङ्गीकरोति। तन्मते –

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः।

अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश॥......[xv]

माधुर्योजप्रसादाख्यास्त्रयस्ते न पुनर्दश।

वामनस्य ये गुणाः (शब्दगताः) तेषु केचित् मम्मटस्य गुणेषु अन्तर्भवन्ति, अन्ये दोषदृष्टत्वात् न गुणभाजो भवन्ति।

❖ **मम्मटदिशा वामनमतखण्डनम् -**

यः अनेकपदानामेकपदवत् भासमानात्मा यः श्लेषः, यश्चारोहावरोहक्रमरूपः समाधिः, या विकटत्वलक्षणा उदारता, यः ओजमिश्रितशैथिल्यात्मा प्रसादः, ओजगुणस्यान्तर्भावः। वामनस्य माधुर्यगुणः मम्मटकृतमाधुर्ये अन्तर्भवति लक्षणस्य साम्पत्वात्। प्रसादेनार्थव्यक्तिर्गृहीता। मार्गभेदरूपा समता क्वचिद्दोषः। (मातङ्गाः किमु...)[xvi]

(सौकुमार्यः, औज्ज्वल्यरूपा कान्तिश्च) कष्टत्वग्राम्यत्वदोषनिराकरणेन अपारुष्यरूपं सौकुमार्यम्, औज्ज्वल्यरूपा कान्तिश्च सप्तमोल्लासे स्वीकृता । एवं न दश शब्दगुणाः।

पूर्वोक्ता ये वामनादिमते श्लेषादिदश शब्दगुणाः तेऽपि अर्थगुणनाम्ना ख्याताः। लक्षणं केवलं भिन्नम्।

या प्रौढिः ओज इत्युक्तं तद्वैचित्र्यमात्रं न गुणः। प्रौढेः पञ्चसु भेदेषु किं वैचित्र्यम्,

**पदार्थे वाक्यरचना वाक्यार्थं च पदाभिधा।**

**प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च॥**[xvii]

एकपदार्थस्य बहुभिः पदैऽभिधानं पदार्थे वाक्यरचनम्। चन्द्र इति वक्तव्ये चन्द्ररूपस्य एकपदार्थस्य अत्रीलोचनसमुत्थं ज्योतिरिति बहुभिः पदैः अभिधानम् वैचित्र्यमात्रम्।

वाक्यार्थे च पदाभिधा – बहूनां पदानामेकपदेन कथनम्। यथा – कान्तार्थिनी लताकुञ्चं व्रजतीत्यादौ बहुपदवक्तव्ये केवलम् **अभिसारिकाम्** इति एकपदेन कथनम् एतदपि वैचित्र्यमात्रम्।

एकेन वाक्येन वक्तव्यस्य यदि अनेकवाक्यैः अभिधानं भवति तर्हि व्यासः नाम विस्तारः भवति। यथा – परस्व नापहर्तव्यमिति । एकवाक्यस्य वक्तव्ये परान्नं नापहर्तव्यम्, परवस्त्रं नानेतव्यम्, पराभरणं न चौर्यम्, इत्यादिभिः बहुवाक्यैः कथनं व्यासः। एतदपि चमत्कारावहम्।

अनेकवाक्यानाम् एकवाक्येन कथनम् समासः ते हिमालयमामन्त्र्य....[xviii] इत्यत्र एकेनैव वाक्येन नानावाक्यार्थीभूतस्य आमन्त्रणादेरुक्तिः। एकवाक्ये बहुवाक्यार्थनिबन्धातृसमास इति भावः एतदपि चर्मत्कारजनकम् मात्रम् ।

यत्र विशेषणस्य सार्थकं भवति तत्र साभिप्रायत्वम् भवति। एददपि चमत्कारकारकं मात्रम्। कुर्यां हरस्यापि पिनाकपाणेः इति स्थाने पिनाकपाणेः इति विशेषणस्य सार्थकतां चकास्ति। कन्दर्पः वदति अहं पिनाकधनुधारिणः धैर्य्यं हरिष्यामि। पिनाकधनुर्योगात् हरस्य महत्वं वर्धते। तथाभूतस्य हरस्य धैर्यहरणात् कन्दर्पस्य महत्वमपि वर्धते। अतः विशेषणस्य सार्थकता अस्ति।

एते पञ्च प्रकाराः ये प्रौढिसंज्ञकाः वामनस्य ओजगुणान्तर्वर्तिनः ते सर्वे वैचित्र्यबाहकाः। प्रथमचतुष्टयाभावेऽपि काव्यव्यवहारः साधीयान् भवेत्। चन्द्र इति पदमेकं विनां अत्रिलोचनसमुत्थं ज्योतिरिति कथनेन न कापि विशेषता। किन्तु प्रतीतिविलम्बः जायते। अपि च अपुष्टार्थता, अधिकपदता, अनवीकृतता, अमङ्गलरूपा, अश्लीलत्वं, ग्राम्यत्वदोषाणां निराकरणेन साभिप्रायत्वरूपमोजः (विशेषणयुक्तम्) अर्थवैशद्यात्मा

प्रसादः, उक्तिवैचित्र्यमात्ररूपमाधुर्यमपारुष्यरूपसौकुमार्यं तथा अग्राम्यत्वरूपम् उदारता इति स्वीकृताः। वामनस्य अर्थगुणान्तवर्तिनौ अर्थव्यक्तिकान्तिगुणौ स्वभावोक्त्यलङ्कारे रसध्वनौ गुणीभूतव्यङ्ग्ये चान्तर्भुक्तौ भवतः।

वामनस्य यः अर्थश्लेषः तत्रापि गुणत्वं नास्ति। सः क्रमकौटिल्यमतिक्रमः। तस्यानुल्बणत्वम् अस्फुटता। क्रमः क्रियासमूहः, कौटिल्यम् – विदग्धचेष्टितम्। अनुल्बणत्वम् – प्रसिद्धित्वम्। एतेषाम् उपपत्तिरूपयोगः। एतेन केवलं कवेः पाण्डित्यं पदर्शि भवति। वामनस्य समतागुणः दोषाभावमात्रस्य दोषाभावः समतागुणः। समाधेरपि गुणत्वं नास्ति। अर्थदृष्टिः समाधिः इति वामनसूत्रम् तत्रायोनिरर्थः । अयोनिः अर्थः अन्यच्छायायोनिरूपस्य द्विविधस्यार्थस्य दृष्टिः (दर्शनम् समाधिः। अर्थात् कविसम्प्रदायेतरवर्णना यथा- सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम् इति हूणः पाश्चात्यो यवनविशेषः। चिबुकम् – ओष्ठाधोभागः। चिबुकं नारङ्गफलमपि स्पर्धयामास इति वर्णना न कुत्रापि कविसम्प्रदाये दृश्यते। अतः अयोनिः स्वबुद्ध्या प्रादुर्भावितः।

अन्यच्छायायोनिः अर्थः प्राक्तनकविपरम्पराव्यवहृतः – भङ्गयन्तरेण यथा –

निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता काऽपि,
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी॥

कविपरम्परानुरोधेन नयननीलोत्पलोयोः साम्यं सर्वजनविदितम्। परन्तु जलमध्ये प्रतिविम्बितं निजनयनम् अवलोक्य किमिदं नीलोत्पलमिति कुसुमलाव्याः तर्केण प्रकारान्तरेण वर्ण्यते। अत्र अन्यच्छाया – योनिः। असमर्थः वर्णितपूर्वो अत्र अन्यच्छाया योनिः अयमर्थः वर्णितपूर्वो अथवा अवर्णितपूर्वः इति आलोचनमात्रम्। अतः न गुणः।

अनेन प्रकारेण मम्मटेन खण्डनानन्तरम् उक्तम् – तेन नार्थगुणा वाच्याः इति दिक् मात्रम्।

वर्णाः समासो रचना तेषां व्यञ्जकतामिताः। [xix]

ते कस्य गुणस्य व्यञ्जका भवन्ति इत्याह –

मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघु।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा॥[xx]

टठडढवर्जिताः कादयो मान्ताः शिरसि निजवर्गान्त्ययुक्ताः तथा रेफणकारौ ह्रस्वान्तास्ताविति वर्णाः, समासाभावे माध्यमः समासो वेति समासः तथा माधुर्यवती पदान्तरयोगेन रचना माधुर्य्यव्यञ्जिका उदाहरणम् –

**अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।**
**कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि॥**[xxi]

आह्लादकत्वं माधुर्यं द्रुतिकारणम्, दीप्त्यात्मविस्तृतेर्हेतुरोज इत्याद्युक्त्या आह्लादकत्वमित्यत्र त्वप्रत्ययेन द्रुतिकारणत्वं माधुर्यम्, दीप्तिजनकत्वमोजः इत्यायानि। अन्यत्रत्वप्रत्ययाप्रयोगेण द्रुत्यादिकारणमित्यायाति।

### ❖ मम्मटोत्तरवर्त्तिसु गुणतत्त्वम् -

ततश्च महान् पदार्थभेदः प्रथमपक्षे द्रुतिकारणत्वं माधुर्यस्य स्वरूपं सत्यं निर्णीतं भवति परं कारणत्वस्याभिव्यञ्जकं न किञ्चित् कुत्रचिदङ्गीक्रियते कैश्चिदिति। तथाभिव्यञ्जकोक्तिः वृथैव जायते।

गोविन्दठक्कुरस्य[xxii] मते अङ्गिनः शरीरष्वात्मकाव्ये प्राधान्येन स्थितस्य रसस्य धर्माः साक्षात्तदाश्रिता। अचलस्थितय इत्यपृथक्स्थितयः। अब्यभिचारिस्थितय इति यावत्। अब्यभिचारश्च रसेन तदुपकारेण वा। तेन रसं विना येनावतिष्ठन्ते अवतिष्ठमानाश्चावश्यं रसमुकुर्वन्तीत्यर्थः। अतएवानयोर्व्यतिरेकालङ्कारे वक्ष्यति स्वयं मम्मटाचार्येण एवं च रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वं, चेति लक्षणत्रयं गुणानां स्पष्टमेव। गुणानां रसधर्मत्वं प्रतिपादितं विश्वनाथेन साहित्यदर्पणे।

पण्डितराजमते द्रुत्याद्यन्तमचित्तवृत्तिप्रयोजकत्वं गुणसामान्यलक्षणम्। अन्यस्य लक्षणस्याकरणात्। काव्यप्रयोज्यचमत्कृतिप्रयोजकतात्वं गुणत्वम्। रसालङ्कारीतिरचनादयश्च मत्कृते प्रयोजका न तु प्रयोजकतारूपाः। प्रयोजकतावत्त्वात्तेष्वपि मधुरादिव्यवहार इष्यत एव। न तु काव्यप्रकाशमते द्रुतिजनके मधुरपदस्य शक्तिः, पण्डितराजमते च द्रुतिप्रयोजक इत्यनयोः कतरः श्रेयान्निति जिज्ञासा चेत् मधुरारचनेत्यादौ लक्षणाकल्पनाभावरूपलाघवेन पण्डितराजमतस्यैव ज्यायस्त्वात्। यथा रसेषु मधुरादि स्वारसिको व्यवहारस्तथा रचनादिष्वपीति किमनुरुद्ध्य चैकत्र शक्तिरन्यत्र च लक्षणा कल्प्यते। जनकत्वमन्यथासिद्धिशून्यत्वघटितम्, प्रयोजकत्वन्तु तदघटितमिति शक्यतावच्छेदकेऽपि लाघवमित्येवं वदसि त्रिपाठिमहोदयः।

इति दिक्

**डा. देवाशिषत्रिपाठी**
सहायकाचार्यः, साहित्यविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी

**॥ सन्दर्भग्रन्थसूची ॥**

भरतमुनी. नाट्यशास्त्रम्. दिल्ली: भारतीय विद्या प्रकाशन, 1983.

मम्मटभट्टः. काव्यप्रकाशः. कोलकाता : संस्कृतपुस्तकभण्डार, 1998.

आनन्दवर्धनः. ध्वन्यालोकः. वाराणसी : चौखम्बा, 1982.

कविराज विश्वनाथः. साहित्यदर्पणम्. दिल्ली : मोतिलाल वनारसीदास – 1977.

Kane P.V. . History of Classical Literature . Bhattacharya Sukumar. Calcutta : 1993.

Winternitz M. . History of Indian Literature. Vol –III. Delhi : Motilal Banarashidas, 1963

शतपथी हरेकृष्णः. संस्कृत साहित्यर इतिहासः (ओडिया) . संस्करण चतुर्थः , कटक : किताबमहल, 2008.

मिश्रः रामचन्द्रः . अलङ्कारशास्त्रेतिहासः . वाराणसी : चौखम्बा विद्याभवन, 1973

कुन्तकः. वक्रोक्तिजीवितम् . वाराणसी : चौखम्बासंस्कृतसंस्थानम् .

दण्डीः . काव्यादर्शः . व्या – शास्त्री शिवनारायण . संस्करणम् – तृतीय . दिल्ली : परिमल पब्लिकेशन्, 2002

उपाध्यायः बलदेव . संस्कृतसाहित्येतिहासः . वाराणसी : शारदा निकेतन, 2001

का. प्रकाश, बालवोधिनीटीका, झल्लकीकरः . दिल्ली : परिमलपब्लिकेशन्, तृतीय संस्कृरणम्

---

[i]. ना. शा. 1.106
[ii]. का. प्र. – 10.591
[iii]. ध्व. लो. – 1. 7.
[iv]. ना. शा – 17.96
[v]. का. सू. – 2.1.2
[vi]. का. द. – 1.41-42
[vii]. अग्नि. पु.
[viii]. स. क. – 1.62-65
श्लेष-समता-माधुर्य – सुकुमारता- अर्थव्यक्ति – कान्ति – उदारता – ओज – औचित्य – प्रेयान् – सुशब्दता – समाधि – सूक्ष्मता – गाम्भीर्य – संक्षेपसम्मितता – भाविकत्व – गति – रीति – उक्ति – प्रौढि – विस्तरान्ताश्चतुर्विंशतिगुणाः ।
[ix]. का. सू - 3.1.4 तथा 3.2.1
[x]. तत्रैव 3.1.5
[xi]. तत्रैव – 3.2.2
[xii]. ना. शा. – 16.17
अभियुक्तैर्विशेषस्तु योऽर्थस्यैबोपलभ्यते।
तेन चार्थेन सम्पन्नः समाधिः परिकीर्त्यते॥
[xiii]. का. सू. 3.2.2
[xiv]. ध्व. लो. – 2.6
[xv]. का. प्र. – 8.72
[xvi]. का. प्र. 7. पृ - 299
[xvii]. का. प्र. – 8. पृ. 480 (झल्लकीकरटीका)
[xviii]. कु. स. – 1.6
[xix]. का. प्र. – 8.73
[xx]. तत्रैव – 8.74
[xxi]. का. प्र. – 7.243 (टीकाग्रन्थः)
[xxii]. काव्यप्रदीपकार – (16 शताब्दी )

# भारतीय समाज और संस्कृति में पुरुषार्थ चिंतन

डॉ0 ममता सिंघल
सहायक आचार्य समाजशास्त्र
राजकीय कला महाविद्यालय
कोटा (राज0)
email btpsjd@gmail.com

सारांश –

भारतीय समाज और संस्कृति में चार पुरुषार्थों– धर्म, अर्थ, काम और मोक्ष– की अवधारणा और प्रचलन प्राचीनकाल से रहा है। इन्हें ही 'पुरुषार्थ चतुष्टय' एवं 'चतुर्वर्ग' के नाम से भी अभिहित किया जाता है। मानव–जीवन को भौतिक, नैतिक और धार्मिक–आध्यात्मिक दृष्टि से उन्नत व संयत बनाने की दृष्टि से इन चार पुरुषार्थों क नियोजन व सम्पादन सदैव से मानव के लिए परमावश्यक रहा है। परन्तु इसके लिए यह अतिमहत्वपूर्ण व अपरिहार्य है कि चारों ही पुरुषार्थों का संतुलित व सम्यक् सम्पादन स्वजीवनकाल में मनुष्य करता रहे, जीवन का लक्ष्य भी सिद्ध होता रहे और समाज व संस्कृति की गौरव–गरिमा और आदर्शों का संरक्षण व संवर्द्धन भी होता रहे। इस हेतु हमारे प्राचीन शास्त्रों में तत्काल से ही समाज में प्रचलित व सम्पादित होने वाले इन चारों पुरुषार्थों का बहुशः विवरण प्राप्त होता है; जो न केवल इस विषयक जानकारी हेतु महत्वपूर्ण है, प्रत्युत् प्राचीन का समाज और संस्कृति के आदर्शों का आधायक भी है। किन्तु कालान्तर में, विशेषकर कलियुग में मनुष्य की प्रवृत्ति भौतिकता प्रधान होने से इन चारों पुरुषार्थों में असंतुलन ने अनेक समस्याओं को जन्म दिया है। समाज व संस्कृति की आदर्श व्यवस्थाएँ और सत् स्वरूप का ह्रास अनेक रूपों में देखा जा सकता है। इसके निराकरण हेतु हर युग, देश और काल में पुरुषार्थों का संतुलित पालन व सम्पादन प्रत्येक मानव के लिए अनिवार्य है।

*मुख्य शब्द –*

| | |
|---|---|
| चतुर्वर्ग / पुरुषार्थ चतुष्टय | – चार पुरुषार्थ (धर्म, अर्थ, काम, मोक्ष) |
| त्रिवर्ग | – तीन पुरुषार्थ (धर्म, अर्थ, काम) |
| पुरुषार्थ | – मानव–जीवन का लक्ष्य, प्रयोजन |
| अर्थ | – धन, भौतिक सम्पदा |
| काम | – इन्द्रिय सुख–आनन्द |
| मोक्ष | – जीवन का अन्तिम व चरम लक्ष्य, ब्रह्मप्राप्ति |

## विषय विवेचन –

'धर्मार्थकाममोक्ष' – इन चार पुरुषार्थों की अवधारणा और निष्पादन वह व्यवस्था है, जिससे कर्तव्यपालन में प्रवृत्तिपूर्वक मनुष्य के जीवन का सम्पूर्ण ध्येय भी सुव्यवस्थित और आदर्शरूपेण सफल व सिद्ध होता है तथा जीवनकाल की आश्रम व्यवस्था की सफलता भी इन्हीं पर निर्भर करती है।

## मुख्य विषय

पुरुषार्थ का तात्पर्य ही है– पुरुष का अर्थ अर्थात् पुरुष – "विवेकशली प्राणी" तथा अर्थ – 'लक्ष्य', 'उद्देश्य' या 'प्रयोजन'।[1] इस प्रकार मनुष्य के जीवन का लक्ष्य ही 'पुरुषार्थ' कहा जाता है। ये चारों धर्मादि पुरुषार्थ इहलौकिक एवं पारलौकिक कर्तव्यों और सुखानन्द का आधार स्वरूप होने के साथ ही इनके सम्यक् और उचित संतुलन का आधार भी हैं। क्योंकि जीवन में कब–कब किस–किस अवस्था में मनुष्य के क्या–क्या कर्तव्य, जिम्मेदारियाँ और व्यवस्थाएँ किए प्रकार सम्पादित करनी हैं और किस अनुपात में? अर्थात् न्यूनाधिक रूप में किस–किस पुरुषार्थ का कितना पालन व महत्व वांछनीय है, इत्यादि समस्त बातें न केवल मनुष्य के जीवन को संयमित, उसके आचार–व्यवहार को परिष्कृत बनाती हैं, बल्कि इनके पालन से उसका पूरा जीवन आदर्शोतप्रोत हो जाता है और फिर व्यष्टि के इसी पुरुषार्थ पालन के माध्यम से समाज व संस्कृति के आदर्श और सर्वांगीण मूल्य जीवन्तता व सुदृढ़ता बनाए रखते हैं। वास्तव में पुरुषार्थ चतुष्टय की अवधारणा सनातन संस्कृति और हिन्दू समाज में जीवन के लक्ष्यबोध के रूप में प्रस्तुत की गई। सात्विक, अनुशासित और आदर्श जीवन–यापन तथा ईश्वर की सृष्टि और समाज को ध्यान में रखते हुए मानव जिस निर्धारित प्रणाली और परम्पराओं का पूर्ण कर्तव्यनिष्ठा और संतुलन के साथ जीवन के चारों आश्रमों अथवा विभिन्न अवस्थाओं में सम्यक् पालन व निवर्हन करता रहा है, वही हमारे समाज व संस्कृति में पुरुषार्थ के रूप में पालित व सेवित है। ये चारों पुरुषार्थ प्रवृत्ति और निवृत्ति का सुन्दर व संतुलित संयोजन भी हैं और भौतिक व आध्यात्मिक सुख के आधायक भी हैं। क्योंकि बिना पुरुषार्थ पालन के सांसारिक व पारलौकिक जगत् के ध्येय व सुखानुभूति सम्भव ही नहीं। इसीलिए ये मानव–जीवन के समग्र उन्नयन का मूलमंत्र स्वरूप सिद्ध होते हैं। मनुष्य जीवन के प्रयोजन ये चार पुरुषार्थ इस प्रकार जाने–समझे जा सकते हैं–

धर्म[2] – भारतीय समाज और संस्कृति में धर्म का सदैव से महत्वपूर्ण स्थान रहा है। जितना भी श्रेष्ठाचरण है "आचारलक्षणो धर्मः"[3] और जो धारण किया जाता है, वह सब धर्म है। शास्त्रों में धर्म के जो लक्षण और व्याख्याएँ मिलती है,[4] वे सभी सदाचरण "आचारप्रभवो धर्मो"[5] एवं धारण करने के आधार पर धर्म को अभिव्यक्त करती हैं।[6] प्रसिद्ध धर्मशास्त्र मनुस्मृति में धर्म का स्वरूप इस प्रकार अभिव्यक्त किया गया है–

> वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
> एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्।।[7]

सदाचार, जो धर्म का लक्षण है, वह क्या है? उसे भी शास्त्रों में बतलाया गया है–

> धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
> धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।[8]

इस प्रकार धैर्य, क्षमादि ये उपर्युक्त दश कार्य–व्यवहार जिसने अपने आचरण में समाहित कर उनका सदैव परिपालन कर लिया, तो यह निश्चित है कि उसने धर्म का भलीभाँति पालन व निर्वहन कर लिया। फिर यह आवश्यक नहीं कि उसे किन्हीं कर्मकाण्डों, आडम्बरों या अन्य प्रपंचों में फँसकर धर्म–कर्म सम्पादित करना जरूरी है। क्योंकि जिसने वास्तविक

धर्म 'सदाचार' का पालन कर लिया, उसने मानो समस्त धर्म का सम्पादन कर लिया; क्योंकि धर्म सदाचार से भिन्न नहीं,[9] बल्कि सदाचार ही धर्म है; वह सदाचार से ही उत्पन्न होता है– "आचारसम्भवो धर्मः" और उसे धारण करना परमावश्यक है। तभी व्यक्ति, समाज और संस्कृति का अनुशासन व आदर्श कायम रह सकता है, अन्यथा नहीं। महाभारत में इस तथ्य को अभिव्यक्त करते हुए कहा है– "धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः।"[10] अर्थात् धर्म प्रजा को धारण करता है; धारण करने के कारण ही उसे धर्म कहा जाता है।

धर्म की व्यवस्था व्यक्ति के सांसारिक जीवन में रहते हुए भी इहलौकिक और पारलौकिक सुखों व उन्नयन की साधिका सिद्ध होती है[11] तथा इसी से व्यक्ति के अन्य पुरुषार्थ भी सिद्ध होते हैं। इसके विपरीत यदि धर्म का पालन न किया जाए, उसकी रक्षा न की जाए, तो वह सब कुछ नष्ट कर देता है – "धर्मोहन्ति हतः श्रियम्।"[12] इसीलिए धर्म संरक्षण और पालन को परमावश्यक कहा गया है; क्योंकि एकमात्र वही व्यक्ति व समाज के लिए परम कल्याणकारक है[13]– "एको धर्मः परं श्रेयः।"[14] सारांशतः धर्म व्यक्ति के नैतिकाचरण व सद्व्यवहार से भिन्न नहीं, अपितु इन्हीं से उद्भूत व सम्पन्न होता है[15] और इसी से मनुष्य का समस्त जीवन और समाज नियन्त्रित, अनुशासित, विकसित एवं उन्नत होता है। अतैव कहा गया है– "यतोऽभ्युदय निःश्रेयससिद्धिः स धर्मः।।" एवं "यतोधर्मस्ततो जयः।"[16]

अर्थ – द्वितीय पुरुषार्थ 'अर्थ' है; जिसका तात्पर्य धन–सम्पत्ति तथा उस भौतिक सम्पदा से है, जिनसे व्यक्ति अपनी अपरिहार्य आवश्यकताओं को भी पूर्ण करता है तथा सांसारिक सुख–भोगों को भी प्राप्त करता है। संसार में रहकर अनेक प्रकार की आवश्यकताओं, कर्तव्यों और उत्तरदायित्वों का निर्वहन धन के बिना सम्भव ही नहीं; इसीलिए कहा गया है कि– "प्राणयात्रापि लोकस्य विना ह्यर्थं न सिद्ध्यति।।"[17] अर्थात् धन के बिना तो जीवनयात्रा भी सम्भव नहीं। अतः प्रत्येक व्यक्ति के लिए 'अर्थ' की आवश्यकता व महत्ता स्वयंसिद्ध है, परन्तु अर्थोपार्जन की भी कुछ सीमाएँ एवं मर्यादाएँ है; जिनमें रहकर ही इस पुरुषार्थ का पालन व सेवन शास्त्र व नियमविहित है। तभी यह सफल भी माना जाता है और उत्तम फलदायी भी होता है। इसके लिए यह परमावश्यक है कि धन का उपार्जन धर्माधारित होना चाहिए।[18] अर्थात् अर्थाजन के निमित्त से किए जाने वाले समस्त कार्य–प्रयासों में अधर्म का लेशमात्र भी नहीं होना चाहिए, बल्कि वह पूर्णतः धर्मयुक्त साधनोपायों से अर्जित किया जाना परमावश्यक है।[19] अधर्म से कमाया हुआ धन एवं सुखभोग कभी सफल व सुखदायी नहीं होते– "अधर्ममूलैर्हि धनैस्तैर्न धर्मोऽथ कश्चन"।[20] धर्म का परित्याग कर धन कमाने वाला तथा धर्म से अधिक धन को महत्व देने वाला व्यक्ति अपने सदाचरण का भी नाश कर लेता है और इस लोक तथा मरने के बाद परलोक में नीचगति को ही प्राप्त करता है– "यो हि धर्म परित्यज्य................ लोकात् क्षुद्रभावं च गच्छति"।[21]

यह तथ्यपरक व व्यवहारिक बात देखी गई है कि जिसके पास धन–सम्पदा होती है, वह मनुष्य लोक में सभी के द्वारा आदर–सम्मान व मान–प्रतिष्ठा पाता है। अतैव कहा गया है– "सर्वे गुणाः काञ्चनमाश्रयन्ति।"[22] परन्तु इसका अभिप्राय व ध्येय यह नहीं होना चाहिए कि स्वयं को धर्म से ही भ्रष्ट बना लिया जाए। अधर्मपूर्वक कमाए गए धन से सम्पादित किए गए धार्मिक कार्यों का भी कोई औचित्य सिद्ध नहीं होता, बल्कि ऐसा धन–लक्ष्मी पीड़ित व्यक्ति की आह व अभिशाप साथ लेकर आता है; जो धनी व्यक्ति के लिए अनेकशः पाप और अनर्थ का कारण बनता है। वर्तमान में धर्म की उपेक्षा कर धन के पीछे भागने वाले और अनुचित व पापपूर्ण कृत्यों एवं साधनों से धनार्जित करने वाले लोगों को शास्त्रविहित 'अर्थ' पुरुषार्थ पर चिंतन अवश्यमेव करना चाहिए। केवल धन कमाना ही पर्याप्त नहीं है, वरन् उसने धर्म, शुभ मंगल व लोक कल्याणकारी कार्यों में लगाना भी अत्यावश्यक है।[23]

काम – "काम्यते जनैरिति कामः सुखः" अर्थात् जिस सुख की कामना मनुष्यों द्वारा की जाए, वह काम है। इसका सम्बन्ध पूर्णतः इन्द्रिय सुख से है। भौतिक सुख–आनन्द में पूर्णतः लिप्त रहना और इसे ही सबसे प्रधान सुखानन्द मानना ही

'काम' है। काम मनुष्य की स्वाभाविक प्रवृत्ति भी है; अतः सभी के लिए महत्वपूर्ण है। परन्तु धर्म व मर्यादा के विरुद्ध और अति के साथ इस पुरुषार्थ का व्यवहार निन्दनीय है; क्योंकि वह स्व–पर, समाज व संस्कृति सभी के लिए कलंक है, अनर्थ का कारण है। इसीलिए शास्त्रों में धर्मविरुद्ध अर्थ व काम का परित्याग करने की शिक्षा व उपदेश दिए गए हैं– "परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ।"[24] काम का सेवन इस प्रकार करना चाहिए कि धर्म व अर्थ को भी बाधा न पहुँचे और मर्यादा व अनुशासन भी बना रहे। कौटिल्य ने अर्थशास्त्र में – "धर्मार्थाविरोधेन कामं सेवेत्।"[25] कहकर संयमित व नियमविहित कामसेवन का उपदेश दिया है। सामाजिक दृष्टि से भी 'काम' का सम्पादन अपरिहार्य है; क्योंकि इसी के द्वारा विवाहोपरान्त प्रजनन के द्वारा सामाजिक विकास व निरन्तरता के ध्येय की पूर्ति होती है तथा परिवार व समाज का अस्तित्व बना रहता है। अतः आवश्यक है कि मनुष्य मर्यादित व वांछित काम का ही सेवन करे। सभी शास्त्रों और हमारे समाज व संस्कृति में दूषित, अवांछित व अतियुक्त काम की निन्दा करते हुए उसे त्याज्य बतलाया गया है। संस्कृति व समाज का सौन्दर्य उचित व मर्यादित 'काम' पुरुषार्थ पर निर्भर करता है।

मोक्ष – मानव–जीवन का अन्तिम व परम पुरुषार्थ 'मोक्ष' है। इसका सम्बन्ध मनुष्य के आध्यात्मिक जीवन से है। मन–मस्तिष्क की पूर्ण शुचिता इसके लिए परमावश्यक है। हालाँकि सभी जनों को मोक्ष की प्राप्ति सम्भव नहीं, परन्तु फिर भी त्रिवर्ग के सम्यक् पालनोपरांत प्रत्येक मनुष्य को स्वयं को जीवन की अंतिम अवस्था में पूर्णतः धार्मिक व आध्यात्मिक साधना में रत रहकर इस हेतु प्रयास करते रहना चाहिए। प्रवृत्ति के बाद निवृत्ति की ओर तथा सांसारिक कुछ–भोगों के रसास्वादन के बाद उनका त्यागकर पारलौकिक सुख की ओर अग्रसर होना परमावश्यक है। इसी से चतुर्थ पुरुषार्थ 'मोक्ष' रूपी परमलक्ष्य सिद्ध होता है। जीवनभर कर्तव्यों के निवर्हन तथा अनेक प्रकार के भोगों से तृप्त होने के बाद स्वतः ही मोक्षमार्ग की कामना होने लगती है और एकमात्र वही सुखकारी लगता है–[26] "नाना भोगोपतृप्तानां मुक्तिमार्गः सुखं भवेत्।"

आत्मा का सच्चा ज्ञान तथा आत्मा–परमात्मा का तादात्म्य ही 'मोक्ष' है। जीव ब्रह्म में लीन होकर मोक्ष को प्राप्त करता है।[27] अन्य तीनों पुरुषार्थों के समान ही आचरण की शुद्धता और सात्विकता मोक्ष–साधना हेतु भी परमावश्यक है। मोक्षप्राप्ति का उद्देश्य जीवन–मरण के बंधन तथा सांसारिक आवागमन के चक्र से मुक्ति व आध्यात्मिक सुख और शाश्वत् आनन्द की प्राप्त है। यह अज्ञानावरण हट जाने से आत्मज्ञान होने पर होती है और प्रत्येक जीव को इसकी कामना रहती है।

## निष्कर्ष –

उपर्युक्त वर्णित चारों पुरुषार्थ मनुष्य के सम्मुख उसके जीवन के चार उद्देश्यों को प्रस्तुत करते हैं। सत्–असत् के विवेकपूर्ण सदाचरण में मनुष्य की प्रवृत्ति तथा सन्मार्ग के दिग्दर्शन एवं वरण से ही 'धर्म' नामक प्रथम व सर्वप्रधान पुरुषार्थ की साधना सम्पन्न होती है, तो धर्माधारित तथा पवित्र व शुद्ध साधनों, मार्गों और कार्य–व्यवहार से अर्जित धन व भौतिक सम्पदा से 'अर्थ' नामक द्वितीय पुरुषार्थ का पालन व सम्पादन होता है। इसी प्रकार मर्यादित व नियमविहित कामोपभोग व्यक्ति की कामप्रवृत्ति की सन्तुष्टि व पूर्ति के साथ ही उसे विभिन्न ऋणों से भी मुक्त करता है, तो समाज व सृष्टि की निरन्तरता को भी साधता है। अंत में चतुर्थ पुरुषार्थ 'मोक्ष' आत्मा–परमात्मा के यथार्थ स्वरूप के ज्ञानपूर्वक नित्य, शुद्ध और सत्–चिदानन्द ब्रह्म की प्राप्ति कराता है– "नित्यशुद्धब्रह्मस्वरूपवान् मोक्षः।" इस प्रकार चारों पुरुषार्थों की भावनावधारणा जीवन के समस्त पक्षों व अवस्थाओं के संतुलित विकास तथा आदर्श स्थिति को बनाए रखते हुए मानव के लक्ष्य तक पहुँचने का आदर्श विधान भी है, तो समाज और संस्कृति के उच्चादर्शों और सौन्दर्य व सतत् गतिशीलता का मूलाधार भी है। परन्तु कलियुग में मानव की अतिभौतिकतावादी एवं भोगप्रधान प्रवृत्ति ने इस परम्परागत आदर्श व्यवस्था में अति असंतुलन व विषमताएँ उत्पन्न कर दी हैं; जिसका परिणाम अनेकशः दुःख स्वरूप व अनर्थकारी सिद्ध होता देखा जा

सकता है। धर्म से विमुखता तथा धर्म के नाम पर आडम्बर, अर्थार्जन की अनुचित दौड़ व प्रवृत्ति, दूषित व अमर्यादित काम–कामना का अतिरेक व मिथ्याज्ञान का दंभ व अति अहंकारादि–आदि के कारण चारों पुरुषार्थों में न केवल असंतुलन देखा जा सकता है, वरन् पुरुषार्थों के वास्तविक स्वरूप को भी विकृत कर दिया गया है। अतः आज आवश्यकता है– प्रत्येक मानव को हमारे समाज व संस्कृति में सदैव से प्रचलित व निर्दिष्ट चारों पुरुषार्थों के शास्त्रसम्मत व समाजसम्मत अनुपालन व सम्पादन की। ताकि समाज व संस्कृति का गौरव पुनःजीवित होकर कायम रह सके व सुदृढ़ बना रहे। साथ ही मानव स्वजीवन के ध्येय को भी प्राप्त कर सके।

## संदर्भ –

1 भारतीय संस्कृति के मूल आधार, पृष्ठ–80
2 वही, पृष्ठ 81–82 एवं संस्कृति और सौन्दर्य, पृष्ठ–19 तथा महाभारत, शान्तिपर्व/21/10–20 एवं अध्याय 60–193
3 महाभारत, अनुशासनपर्व/104/19
4 महाभारत, अनुशासनपर्व/22/18 तथा मनुस्मृति, 2/12, 6/92–93
5 महाभारत, अनुशासनपर्व/149/137
6 महाभारत, वनपर्व/2/75, शान्तिपर्व/21/11–12, 36/10
7 मनुस्मृति, 2/12
8 मनुस्मृति, 6/92 तथा महाभारत, वनपर्व/2/75 "इज्याध्ययन.........मार्गोऽयं धर्मस्याष्टविधः स्मृतः।।"
9 महाभारत, वनपर्व/150/28
10 महाभारत, कर्णपर्व/69/58 एवं अन्य स्थल–शान्तिपर्व/109/11
11 धर्मशास्त्रों में व्रतोपवास : सामाजिक परिप्रेक्ष्य में, पृ. 4
12 महाभारत, उद्योगपर्व/72/19 एवं मनुस्मृति, 8/15
13 संस्कृति और सौन्दर्य, पृष्ठ–19 एवं मनुस्मृति, 8/17
14 महाभारत, उद्योगपर्व/33/52
15 भारत की प्राचीन संस्कृति, पृष्ठ 177 – "सदाचार का महत्व"
16 महाभारत, भीष्मपर्व/2/14 एवं अनुशासनपर्व/167/41
17 महाभारत, शान्तिपर्व/8/7
18 याज्ञवल्क्य स्मृति, आचार अध्याय/340–41; महाभारत, शान्तिपर्व/88/24
19 महाभारत, शान्तिपर्व/अध्याय 60–61, 130/48–50, 141/90, 88/14–15
20 महाभारत, शान्तिपर्व 111/16
21 महाभारत, द्रोणपर्व/24/14
22 नीतिशतकम्, 41
23 नीतिशतकम् 43 एवं संस्कृति और सौन्दर्य, पृ. 21 तथा महाभारत, शान्तिपर्व/8/16
24 मनुस्मृति, 4/176
25 कौटिल्य, अर्थशास्त्र, 17
26 मनुस्मृति, 6/33,36
27 भारतीय संस्कृति के मूल आधार, पृ. 84

## संदर्भ ग्रन्थ सूची

– धर्मशास्त्रों में व्रतोपवास : सामाजिक परिप्रेक्ष्य में – सुनीता ओझा, नारायण प्रकाशन, जयपुर, संस्करण 2003
– नीतिशतकम् – डॉ. रामनारायण एवं डॉ. रणजीत कुमार झा, जगदीश संस्कृत पुस्तकालय, जयपुर, संस्करण – 2015
– भारतीय संस्कृति के मूल आधार, रमेश चन्द्र घुसिंगा, जगदीश पुस्तकालय, जयपुर, संस्करण–2017
– भारत की प्राचीन संस्कृति, रामजी उपाध्याय, लोकभारती प्रकाशन, इलाहाबाद, संस्करण–2003
– मनुस्मृति, टीकाकार – पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत सीरीज, ऑफिस, वाराणसी, संस्करण–2011
– महाभारत, वेदव्यास, गीताप्रेस गोरखपुर प्रकाशन, भाग, 2–5, सं. 2065
– याज्ञवल्क्य स्मृति, आचाराध्याय, डॉ. कमलनयन शर्मा, जगदीश संस्कृत पुस्तकालय, जयपुर, संस्करण–2016
– संस्कृति और सौन्दर्य, डॉ. रामसजन पाण्डेय, संजय प्रकाशन, दिल्ली, प्रथम संस्करण – 2006

## श्रीसायणाचार्यकृतछान्दोग्योपनिषद्भाष्यसमीक्षणम्

***Śrīsāyaṇācāryakr̥tachāndōgyōpaniṣadbhāṣyasamīkṣaṇam***

ब्रह्मचारी शुभदीपः
शोधच्छात्रः (पि.एइच.डि), संस्कृतदर्शनविभागः,
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्,
बेलुड-मठः, हाओडा-७११-२०२, पश्चिमवङ्गः।
इ-मेल- shubhadip@gm.rkmvu.ac.in

**शोधसंक्षेपः** -

श्रीसायणाचार्यस्य (चतुर्दशशतकीयस्य) नाम्नि प्रसिद्धः चतुर्वेदभाष्यग्रन्थः सायणमाधवीय- वेदार्थप्रकाशाख्यमिति तु सर्वेषामस्माकं विदितगोचरमेव। प्रकाशिताप्रकाशिततया मातृकारूपेण वा एतेषां भाष्याणामुपलब्धिर्भवति अद्यापि, परन्तु कालस्य प्रभावात् केचित् तु विलयं गता इत्यपि परिलक्ष्यते। तत्र छान्दोग्योपनिषत्वस्तुतः सामवेदस्य कौथुमशाखायाः अष्टब्राह्मणेषु अन्यतमस्य छान्दोग्यब्राह्मणस्य अन्तिमभागः। दशभागात्मकस्यास्य ब्राह्मणस्य प्रथमद्वितीयध्यायौ मन्त्रब्राह्मणनाम्नि प्रसिद्धौ, अन्तिमस्तु उपनिषन्नाम्नि प्रख्यात इति। यद्यपि आदिमे मन्त्रभागे गुणविष्णसायणाचार्ययो भाष्ये समुपलभ्येते, परन्तु सायणभाष्यमेव पूर्णतया उपलभ्यते।

एवं मूलतः मातृकागारेषु पाण्डुलिपीनाम् अनुसन्धानसमये सायणाचार्यकृतस्य उपनिषद्भाष्याणामुपरि आदौ अस्माभिरवलोकितम्, तत्र शाखागतस्य एकस्य व्याख्यानावसरे सम्पूर्णस्य एव भाष्यमकारि सायणाचार्यः इति सामान्यरूपेण अस्माभिः परिलक्ष्य निर्णितम्। तत्र दृष्टान्ताः ईशोपनिषत्, ऐतरेयोपनिषत्, तैत्तिरीयोपनिषत् इत्यादयः। अतः स्वभाविकतयास्य छान्दोग्योब्राह्मणस्य अन्तिमभागस्य छान्दोग्योपनिषदाख्यभागस्य विषये जिज्ञासास्माकमुपजायते यत् अस्मिन् भागे तैः भाष्यं कृतं न वेति, ततश्च संशयस्यास्य निवारणाय अस्माभिः प्रयत्नः विहितः।

अतः छान्दोग्योपनिषदि सायणाचार्यकृतभाष्यस्य पञ्चशानां मातृकानाम् आभारतं विभिन्नेषु स्थलेषु प्राप्तिर्जाता। अपि च छान्दोग्योपनिषद्दीपिकाख्यस्य एकस्य प्रकाशितग्रन्थस्यापि उपलब्धिर्जाता। परन्तु प्रकाशनमिदं न समालोचनात्मकमिति[1] निश्चयेन वक्तु शक्यते।

अथ मूलप्रबन्धे अस्माभि एतेषां मातृकानां विषये आलोचनं विधाय, प्रकाशितग्रन्थस्य तुलनात्मकतया विचारः प्रस्तोष्यते। अपि च अस्माभिः, एवञ्च अस्य भाष्यांशस्य कतृत्वं श्रीसायणाचार्याणामेव इति सप्रमाणं प्रदर्श्य, अस्य श्रीसायणाचार्यकृतछान्दोग्योपनिषद्भाष्यस्योपरि अग्रिमगवेषणस्यावकाशः प्रदर्श्यते इति शिवम्।

---

[1] **प्रबन्धेस्मिन् "Critical Edition" इति प्रयोगस्थले "समालोचनात्मकमिति" पदं प्रयुज्यते।**

*****

**०. उपक्रमः**- श्रीसायणाचार्यस्य (चतुर्दशशतकीयस्य) नाम्नि प्रसिद्धः चतुर्वेदभाष्यग्रन्थः वेदार्थप्रकाशाख्यातं इति तु सर्वेषामस्माकं विदितप्रायः। प्रकाशिताप्रकाशिततया मातृकारूपेण वा एतेषां भाष्याणामुपलब्धिर्भवति अद्यापि, तथापि कालस्य प्रभावात् केचित् तु विलयं गता।

तत्र यथा शुक्लयजुर्वेदसंहितायाः भाष्यरचनाकाले ईशोपनिषद्, ऐतरेयारण्यकस्य व्याख्यानसमकाले ऐतरेयोपनिषत्, अपि च तैत्तिरीयारण्यकस्य निरूपणसमये तैत्तिरीयोपनिषत्, महानाराणयोपनिषच्च व्याख्याते। अपि तु मातृकानां संग्रहसमये अस्माभिः अन्येषामपि दशसु मुख्योपनिषदः केषाञ्चित् नाम तत्र लक्षितम्, यद्यपि साक्षात् न दृष्टत्वात्, उपलब्धेः अशक्यत्वात् च नाममात्रेण तेषां ग्रहणं कर्तुं शक्यन्ते। अग्रे मूलप्रबन्धे शोधनिष्कर्षस्य उपस्थापनप्रसङ्गे सामान्येन निरूपणं विधाय तृतीये परिशिष्टे सयोज्यते ।

तत्र छान्दोग्योपनिषत् वस्तुतः सामवेदस्य कौथुमशाखाया अष्टब्राह्मणेषु अन्यतमस्य छान्दोग्यब्राह्मणस्य अन्तिमा। अस्य ब्राह्मणस्य मूलविषये क्वचित् संशयो वर्तते, ते च यथाप्रसङ्गं निरूपयिष्यन्ते।

**१. छान्दोग्योपनिषदाख्यस्य सामवेदार्थप्रकाशस्य व्याप्त्युपलब्धिकर्तृत्वविषये निर्णयाभावः** -

**१.१. प्रकृतप्रसङ्गस्य व्याप्तिविषये शङ्का** - आ बहोः कालात् वेदानामर्थप्रतिपादनाय बहुभिः आचार्यैः नैकानि भाष्याणि कृतानि वर्तन्ते। तत्र श्रीसायणाचार्यानां नाम्नि प्रसिद्धः चतुर्वेदभाष्यग्रन्थः वेदार्थप्रकाशाख्योऽपि विराजते। तत्र वेदस्य कियान् अंशः वेदार्थप्रकाशव्याख्यया सहितो वर्तते इत्यत्र निश्चयो नाद्यावधि सञ्जातः। यद्यपि श्रीसायणाचार्यैः उपनिषद्भागस्य व्याख्याने विशेषतया अवधानं न दत्तम्, तथापि शाखागतत्वेन केषाञ्चित् व्याख्यानं तैः कृतमिति ज्ञायते। परन्तु सामवेदीयब्राह्मणस्य व्याख्यानसमये तैः उपनिषद्भागस्य व्याख्या कृता न वा इति शङ्का अस्मासु समजनि। अत्र कारणत्वेन राजेन्द्रलालमित्रकृतायाः छान्दोग्योपनिषद अनुवादसमये भूमिकायामूहितं यत् - "Several scholars had actually doubted its existence, but Rajendralal Mitra, ..., states that in India, MSS. of the work are easily available, through as yet he has seen no commentary attached to the Brahman portion of any of them.."[2] अतः अस्य सामवेदीयछान्दोग्यब्राह्मणानाम् उपनिषद्भाष्यस्य व्याप्तिविषये जिज्ञासा स्वभावत उपजायते।

**१.२. प्रकृतप्रसङ्गस्य उपलब्धिविषये शङ्का** - एवं व्याप्तिविषये शङ्कायाम् एतस्य उपलब्धिविषये निश्चयः कर्तव्येति धिया प्रयत्नः विहितः। परन्तु तत्र सायणाचार्याणां नाम्नि मातृकागारेषु, प्राकशितमातृकासूचीषु च अवलोकनं कृत्वा पुनरेतस्य उपलब्धिविषये शङ्का वर्धिता। यतो हि तत्र साक्षात् वेदार्थप्रकाशनाम्नि येषाम् उल्लेखः वर्तते, तेषु नैके

[2] Chandogya Upanishad, translation by Rajendralal Mitra, Calcutta, 1862, Introduction, p.17

अनुपलब्धाः। कारणं तु भिन्नभिन्नमेव इति मातृकाविषये येषां सामान्यमपि वा ज्ञानं वर्तते, ते जानीयुः। तथापि द्वित्राणामुल्लेखोऽस्माभिरत्र क्रियते। तत्र प्रथमं मातृकागारे मातृकानां प्रथमतया सज्जीकरणकाले तैः यथा निर्देशः कृतः, ततश्च तालिकानां प्रकाशनमपि तैः कृतम्, परन्तु काले ग्रन्थागारस्य नवीनतया सज्जीकरणं वा एकस्मिन् ग्रन्थागारात् अन्यत्र गमनात् वा तालिकास्थितसंख्यातः पुन अन्वेषणं कर्तुं न शक्यते। द्वितीयो भवति मातृकाग्रन्थागाराणां मातृकानां विषये तथ्यप्रदाने असहयोगः। यतो हि तेषु सम्पर्क असम्भवः, कथञ्चित् कृते सति तथ्यप्रदाने दीर्घसूत्रिता। एवञ्च तृतीयकारणत्वेन सम्पादनविषये तैः मातृकांश एव दीयते, न तु पूर्णरूपेणेति।

**१.३. प्रकृतप्रसङ्गस्य सायणकर्तृत्वविषये शङ्का** - तत्रापि पुनः सायणाचार्यः एकाकी चतुर्वेदभाष्यमखिलं प्रणीतवान् इत्यस्ति शङ्का, यतोहि तत्कालीनाः केचन अन्येऽपि विद्वांसः वेदार्थप्रकाशाख्यस्य वेदभाष्यस्य रचनायां सायणाचार्याणां सहायकाः अभूवन्[3] इति ज्ञायते। वाजपेयाजी नारायणः, सोमयाजी नरहरिः, दीक्षितः पण्डरिश्चेति त्रयो ब्राह्मणाः अपि चतुर्वेदभाष्यप्रवर्तकाः इति इतिहासपरिशीलनपटुः आर्. नरसिंहाचार्यः शिलालेखप्रामाण्यात् वदति[4]। अतः सम्पूर्णरूपेण वेदार्थप्रकाशस्य कर्ता श्रीसायणाचार्यः अन्ये वा इति सन्देहे सायणाचार्यकृतत्वेन उपलभ्यमानस्य छान्दोग्योपनिषद्भाष्यस्य तत्कर्तृत्वं यथायथं विवेचनीयम्।

**२. प्रकृताध्ययनविचारविषयभूतं वाङ्मयादिकम्** - सामवेदीयब्राह्मणप्रसङ्गे श्रीसायणाचार्याः छन्दोग्यब्राह्मणभाष्य-भूमिकायाः भाष्यप्रारम्भे लिलिखुः यत्-

“अष्टौ हि ब्राह्मण ग्रन्थाः पौढं ब्राह्मणमादिमम्
षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत्।
आर्षेयं दैवतञ्चैव मन्त्रं वोपनिषत्ततः
संहितोपनिषद् वंशो ग्रन्था अष्टावितीरिताः।”[5]

तत्र वस्तुतः सामवेदस्य ब्राह्मणानां संख्या अन्येषां वेदभागानामपेक्षया अधिका वर्तते, शाखान्तरगतत्वेन कौथुमशाखाया अष्टौ ब्राह्मणानि सन्ति। ते यथा पौढ-षड्विंश-सामविधान-आर्षेष-देवताध्याय-मन्त्र-संहितोपनिषद्-वंशब्रह्मणानि। अथ इदानीं ब्राह्मणानां संख्याविषये अस्माकं मनसि काचन शङ्का उदेति, किमिदं छान्दोग्यमिति। अत्र शङ्काया समाधानादौ वेङ्गवेदविदुषः[6] सत्यव्रतसामश्रमिकृतस्य विचारं समासेन आलोच्यते - तेषां मते ताण्ड इत्याख्यस्य एकमेव सामवेदीय कौथुमशाखियं ब्राह्मणम्, ऋक् अपि च यजुः इत्युभयोः गद्यपद्यात्मकस्य अखिलस्य छन्द इति नामधेयम्, छन्देन गीयते चेत्

[3] Sastri S. Srikantha, P. 1

[4] Narasimhacharya, R., 1916, P. 19

[5] छान्दोग्यब्राह्मणम्, पृ. ३.

[6] सत्यव्रतसामश्रमी वङ्गवेदविद्वान् कश्चन महान पण्डित आसीत्। विदुषै एनं “Sayana of Bengal” इत्याख्येन आख्यायते।

तत् गीतमिति लोकः। अतः सामवेदीब्राह्मणस्य छन्दोग इति नामान्तरम् वर्तते। तत्र छन्दरूपेण प्रकाशितत्वात् छन्दोगैः गीतत्वात् वा ग्रन्थस्य नामन्तरं भवति छान्दोग्यम्, एवं छान्दोग्यमिति तु यौगिकमाख्यानम्। अपि च ताण्डि इत्युपाधेयैः सामगाचार्यैः प्रकाशितत्वात् ताण्डमिति अभिधानम्। तत्र प्रकृतप्रसङ्गे श्रीसायणाचायैः उल्लिखितं प्रौढमिति नामकरणं तु अस्य ब्राह्मणस्य पूर्वार्धं सूचयति। अपि च यथा शतपथब्राह्मणं चत्वारिशाध्यायेषु विभक्तं, तत्र याज्ञिकम् औपनिषदमिति च अस्यावान्तरभेदौ, तद्वत् सामवेदस्य कौथुमशाखीयानां ब्राह्मणानां प्रसङ्गे अपि तथैव। एवमत्रापि याज्ञिकाशं तु पूर्वार्धे त्रिंशताध्याये विभक्तम्, अपि च अन्तिमस्य दशाध्यायस्य औपनिषदमिति प्रसिद्धिः। किञ्च पूर्वभागे आदिमाध्यायद्वये यथा श्रौतकार्यनिरूपणाय मन्त्राणामुपयोगः वर्तते, तथैव उत्तरकाण्डे अध्यायद्वये गृह्यकार्यविषयकस्य मन्त्रस्य उपलब्धिर्वर्तते। अतः श्रीसायणाचार्येण त्रिंशताध्यायात्मकस्य प्रथमभागस्य आपञ्चविंशत्याध्यायस्य नाम प्रौढमिति संज्ञितम्, तथैव षड्विंशादि अन्तिमाध्यायपञ्चकं षड्विंशत्वेन अभिहितम्। अत्र मूलश्लोके "षड्विंशाख्यं द्वितीयं स्यात्" इत्यादिरूपेण निर्देशितं ग्रन्थभागं तु प्रौढब्राह्मणस्य याज्ञिकभागस्य अन्तिमः षड्विंशादि अध्यायपञ्चकम्। तत्र षड्विंशाख्यस्य ब्राह्मणभागस्य अन्तिमाध्याये अद्भुतशान्तेः उपायस्य उपदिष्टत्वात् केचन अन्तिमभागस्य अद्भूतब्राह्मणम् इत्याख्येन निर्दिशमकार्षुः। एवं कौथुमशाखीयस्य ब्राह्मणस्य संख्या एका वर्धिता, अद्भुतब्राह्मणस्य एतेषु आधिक्येन परिगणिततत्वात्। एवं षड्विंशम् अपि च अद्भूतमित्युभयमपि ताण्ड्यब्राह्मणस्य याज्ञिकभागस्य अन्तिमभागः। एवं श्रीसायणाचार्यकृतविभागेषु षष्ठब्राह्मणस्य प्रकृतस्य नाम, न तु मन्त्रः न वा उपनिषदिति। अपि तु आदिमध्यायद्वयं मन्त्रब्राह्मणम् एवञ्च अन्तिमाष्टमानां छान्दोग्योपिनिषदित्याख्यानम्। साकल्येन दशाध्यायात्मकं ब्राह्मणमिदं ताण्ड्यब्राह्मणस्य अवशेष इति। एवं सर्वमाहत्य सामवेदस्य एकमेव ब्राह्मणं छान्दोग्यमिति।

एवं सामविधिः सामविधानं वा, आर्षेयं, दैवतं देवताध्यायं वा, संहितोपनिषद् अपि च वंशाख्यान्तः पञ्चब्राह्मणमिदं न प्रकृतब्राह्मणत्वेन विदुषैः गण्यते। परं ते वैदिकवाङ्मये ब्राह्मणसदृशः सम्माननीयश्च। अत एतेषामनुब्राह्मणमिति नामान्तरम्। तत्र कैश्चित् एवमाक्षिप्यन्ते यत्- यदि इमे ब्राह्मणग्रन्थाः भवेयुः, तर्हि निदानसूत्रः प्रभृतिग्रन्थेषु उल्लिखितमनुब्राह्मणं किम्, एवञ्च भगवता पाणिनिना विरचितस्य अनुब्राह्मणादिनिः (४.२.६२) इति सूत्रस्य क आशयः, इति विचारणीयम्।

अतः छान्दोग्योब्राह्मणस्य स्वरूपनिर्धारणाय आदौ सामवेदीयस्य कौथुमशाखीयब्राह्मणानां विभागेषु अवधानं दातव्यं, तत्र अष्टब्राह्मणेषु प्रौढब्राह्मणं समग्रस्य छान्दोग्यब्राह्मणस्य पञ्चविंशखण्डात्मकं, एवञ्च द्वितीयं षड्विंशब्राह्मणं तु पञ्चखण्डात्मकम्। तत्रापि षड्विंशब्राह्मणस्य अद्भुतब्राह्मणत्वेन प्रसिद्धित्वात्, पृथक् संज्ञा। एवं षड्विंशब्राह्मणस्य अग्रिमाध्यायद्वयस्य मन्त्रब्राह्मणम् उपनिषद्ब्राह्मणमिति वा नामधेयम्। इतोऽपि अपरमेको भागो दृश्यते, यत्र दशप्रपाठकविशिष्टस्य छान्दोग्यब्राह्मणस्य प्रथमप्रपाठकद्वयस्य मन्त्रब्राह्मणत्वेन, अन्तिमस्य अष्टमप्रपाठकस्य छान्दोग्योपनिषदिति नाम। तत्र मन्त्रब्राह्मणस्य प्रतिप्रपाठके अष्टौ खण्डाः, एवमाहत्य अध्यायद्वये षोडशखण्डाः सन्ति। एवमस्य ब्राह्मणस्य खण्डद्वये जातकर्मादिसंस्कारात् आरभ्यः विवाहाद्यखिलस्य गार्हस्थ्यकर्मणां संङ्कलनं वर्तते, तत्र

प्रथमप्रपाठके संस्काराङ्गत्वेन मन्त्राः निबद्धाः, अपि च द्वितीयप्रपाठके शान्तिविधायकमन्त्रानां, अग्रहायणं, अग्निसंस्कारं, श्राद्धाङ्गादि नानाविधमन्त्राणां संङ्कलनं दृश्यते। अतः सामवेदीय गृह्यकर्मसमूहे अस्य ब्राह्मणस्य नामान्तरं भवति मन्त्रयोनि इति।

**२.१. मन्त्रब्राह्मणम्-** एवञ्च प्रथमभागे सामवेदीय कौथुमशाखीयानां ब्राह्मणानां विवाहादि संस्काराणां मन्त्रसमूहस्य उल्लेख वर्तते, अत अस्याः शाखायाः ब्राह्मणानाम् अतिप्रयोजनीयत्वात् अस्य प्रसिद्धिः। विशेषतः बङ्गप्रदेशे प्रायः सर्वे ब्राह्मणाः सामवेदीया इति तु प्रसिद्धिः। तथापि आदिमाध्यायद्वयात्मकस्य मन्त्रब्राह्मणस्य कथं लोपः सञ्जात इति तु आश्चर्यं, तत्र श्रौतकर्मादिषु ब्राह्मणानां अनीहा एव अस्य लोपस्य कारणत्वेन अस्माभिः उह्यते। यद्वा भवतु, अस्य मन्त्रात्मकस्य ब्राह्मणभागस्योपरि गुणविष्णुः सायाणाचार्य इत्युभयेन भाष्यं कृतं वर्तते। तत्र प्रथमतया श्रीदुर्गामोहनभट्टाचार्येण कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमालाया प्रथमग्रन्थाङ्के अस्य भाष्यद्वयस्य प्रकाशनं १९५८ ईसवीयाब्दे विहितम्। अपि च अनेन पूर्वं केवलं गुणविष्णुकृतभाष्यस्य सम्पादनं कृतमिति तैः उल्लिख्यितम्[7]। ततःपूर्वं तु सत्यव्रतसामश्रमीना १८७२ ईसवीयब्दे अस्य मन्त्रब्राह्मणस्य बङ्गभाषया अनुवाद अपि च टीकामेकं विरच्य प्रत्नकम्रनन्दिनी इति पत्रिकायां प्रकाशयामास।[8] अपि च अन्यदेकं व्याख्यानं तैः विरच्य तत्र १८९० ईसवीयाब्दे प्रकाशयामबभूव।[9] द्वितीयव्याख्याने तु तैः पूर्वस्य क्वचित् संशोधनमपि विहितम् इति दुर्गामोहनभट्टाचार्यकृतग्रन्तस्य भूमिकायां दृश्यते। एवञ्च "दास् मन्त्रब्राह्मण" (*Das Mantrabrāhmaṇa*) इति नाम्ना प्रथमद्विर्यीयप्रपाठकयो पृथक्पृथगेव सम्पादनमपि च जार्मानभाषया तयोः अनुवादोपि कृत[10]।

**२.२. उपनिषद्ब्राह्मणम्-** उपनिषद्ब्राह्मणम् इति नामकरणं तु प्रकृतप्रसङ्गे श्रीसायणाचार्यकृतस्य "मन्त्रं वोपनिषत्ततः"[11] इति उक्त्या अस्य ब्राह्मणस्य अन्तिमाष्टमौ तु उपनिषत्त्वेन गण्यते, अस्यैव नामान्तरं छान्दोग्योपनिषदिति। 'ओमित्येतदक्षरम्' इत्याद्यष्टाध्यायी छान्दोग्योपनिषत् इति भगवत्पादेनापि अस्य अष्टाध्यायीत्वम् सूच्यते। मुख्यदशोपनिषत्सु अस्याः स्थानम् अन्यतमम्। अत्र भाष्यकारत्वेन व्याख्याकारत्वेन वा ब्रह्मानन्दी-द्रामिडाचार्य-श्रीशङ्करभगवत्पाद-भाष्करभट्ट-नरेन्द्रपूरी-माधवाचार्य-आनन्दगिरि-सुदर्शनसुरी- ज्ञानान्द-बालकृष्णानन्दप्रभृतिनां नामानि ग्रहीतुं शक्यन्ते। एवञ्च अन्येषामपि केषाञ्चित् नामानि अनुवादकृत्सु गणयितुं शक्यते, तेषु दाराशुकस्य पारसिकभाषायाम् अनुवादः,

---

[7] "When, twenty-seven years ago, my edition of *Guṇaviṣṇu's Chāndogyomantrabhāṣya,* a commentary on select Vedic Mantras was published in the Sanskrit Sahitya Parishad Series..." (*Chāndogyobrāhmaṇam,* p. ix )

[8] *Mantrabrāhmaṇa,* Ed. Satyavrata Samashrami, *Pratnakamranandinī* (Vol. V), Sereampore, 1872.

[9] *Mantrabrāhmaṇa,* Ed. Satyavrata Samashrami, Kolkata, 1890.

[10] *Das Mantrabrāhmaṇa* (First Prapāṭhakaḥ), Ed. Heinrich Stönner Halle a. S 1901. *Das Mantrabrāhmaṇa* (Second Prapāṭhakaḥ), Ed. Hans Jørgensen, Darmstadt, 1911.

[11] छान्दोग्यब्राह्मणम्, पृ. ३.

राघवेन्द्रयतेः व्याख्यानम्, अप्पय्यदीक्षितस्य अद्वैतपरकं भाष्यम्, अद्वैतानन्दतीर्थस्य भाष्यम्, भाष्करपरिव्राजकस्य पदार्थविवरणं प्रभृतयः।

एवं प्रसङ्गेऽस्मिन् श्रीसायणाचार्यकृतछान्दोग्योपनिषद्भाष्यस्योपरि भाष्यमिदम् छान्दोग्योपनिषद्दीपिकेति नाम्नि प्रसिद्धम्। अनेन भाष्यकरणेन भगवत्पादकृतस्य भाष्यस्य वैयासिकन्यायमालायाश्च उपयोगः कृतः। तैः भाष्यभूमिकायां लिलेख यत् - "छान्दोग्योपनिषद्व्याख्यां श्रीमच्छङ्करमार्गतः। कुर्वे वैयासिकन्यायैः संयुक्तां तत्त्वबुद्धये।"[12] विषयस्तु प्रबन्धाग्रे उपलब्धिविचारसमये विस्तार्यते।

**३. प्रकृतविषये निर्णयाय आश्रीयमाणा प्रक्रिया -** मूलतः मातृकागारेणु पाण्डुलिपीनाम् अनुसन्धानसमये सायणाचार्यकृतस्य उपनिषद्भाष्याणामुपरि आदौ अस्माभिः अवधानं दत्तमासीत्, तत्र शाखागतस्य एकस्य व्याख्यानावसरे सम्पूर्णस्य एव भाष्यमकारि सायणाचार्यः इति सामान्यरूपेण अस्माभिः परिलक्षितम्। तत्र उदाहरणत्वेन ईशोपनिषत्, ऐतरेयोपनिषत्, तैत्तिरीयोपनिषत् इत्यादयः। अतः स्वभाविकतया अस्य छान्दोग्योब्राह्मणस्य अन्तिमभागस्य छान्दोग्योपनिषदाख्यस्य विषये जिज्ञासास्माकमुपजायते यत् अस्मिन् भागे तैः भाष्यं कृतं न वेति, ततश्च संशयस्यास्य निवारणाय अस्माभिः यत्नः विहितः।

अतः छान्दोग्योपनिषदः सायणाचार्यकृतभाष्यस्य पञ्चशानां मातृकानाम् आभारतं विभिन्नेषु स्थलेषु प्राप्तिर्जाता। अपि च छान्दोग्योपनिषद्दीपिकाख्यस्य एकस्य प्रकाशितग्रन्थस्यापि उपलब्धिर्जाता। परन्तु प्रकाशनमिदं न समालोचनात्मकमिति निश्चयेन वक्तु शक्यते।

अथ मूलप्रबन्धे आदौ अस्माभिः एतेषां मातृकानां विषये आलोचनं विधाय, प्रकाशितग्रन्थस्य तुलनात्मकतया विचारः प्रोस्तोष्यते। अपि च अस्माभिः, अस्य श्रीसायणाचार्यकृतस्य छान्दोग्योपनिषद अग्रिमगवेषणस्यावकाशः प्रदर्श्यते इति शिवम्।

**४. प्रकृतविषयस्य व्याप्तिविषये विचारो निर्णयश्च -** अथेदानीं प्रकृतविषयस्य व्याप्तिविषये अस्माभिः विचार्यते। तत्र छान्दोग्योपनिषदः व्याप्तिः प्रबन्धस्य आदावेव अस्माभि आलोचितम्, परन्तु अस्य भाष्यस्यास्य कियती व्याप्तिरितीदानीं विचार्यते। तत्र मातृकागारेषु अवलोकानात् पूर्वमस्माभिः "क्याटालोगास् क्याटागोरियाम्" (Catalogus Catalogorum) अपि च "निउ क्याटालोगास क्याटागोरियाम" (New Catalogus Catalogorum) इति मातृकानां सूचीविषयकग्रन्थमध्ये अन्वेषणं कृतम्। ततः छान्दोग्योपनिषदः श्रीसायणाचार्यविरचितभाष्यसहितं द्वित्रानां मातृकानां विषये आपततं ज्ञानं जातम्। एवं प्रबन्धस्यान्ते पाण्डुलिपिनां तालिकायां सर्वमस्माभिः योजितम्। अतः पुनरूक्तिदोषात् अस्माभिः तासामुल्लेखात् विरम्यते। ते च यथावसरं प्राप्त्यर्थम् यावत्शक्तिः चेष्टितमस्माभिः, तेषु एकस्य विषये द्वित्री पत्रानामुपलब्धिर्जातः, अनेषां विषये तु केवलं विस्तारेण ज्ञातम्, परन्तु न साक्षात्प्रतिलिपिः (Xerox), वैद्युतिनप्रतिलिपिः

[12] छान्दोग्योपनिषद्दीपिका, पृ. १.

(Scan copy) वा एतावता न प्राप्तम्। एवम् अत्र व्याप्तिविषये विचारकाले यथाप्रतिभातम् मातृकातः, तेषां विषये निर्णयाय इदानीं यत्न क्रियते।

अथेदानीम् एतेषु द्वयो विषये निरूपणं क्रियते। तत्र प्रथमं भवति, भाण्डारकर ओरिएन्टल रिसर्च इन्स्टीट्यूट् इति संस्थायाः। अस्याः मातृकासंरक्षणसंस्थायाः मूलकेन्द्रं भवति पुण्यपत्तनम्। अथ समग्रे प्रबन्धे अस्याः मातृकाया विषये उद्धरणसमये अस्माभिः भ.१ इति नाम्ना उद्ध्रियते। मातृका इयं छान्दोग्योपनिषद्दीपिका इति शीर्षकेन अङ्कितम्, कर्ताश्च सायणाचार्यः, संख्याश्च २१. विश्राम (१), नूतनया अस्या सज्जीकरणात् परमस्या संख्या भवति सेकसन ३., तत्र उपकरणं 'कागज इति ज्ञायते। लिपिः च देवनागरी। एवं सम्पूर्णतया भाष्यमिदं लभ्यते, अतः पत्रसंख्या २२३, किञ्च तत्र ९९ इति संख्यकं पत्रं त्रुटिपूर्णं वर्तते। अस्याः परिमापः १२ ३/४" * ४ १/२"। अत्र प्रत्यकस्मिन् पत्रे प्रायः सप्तपङ्क्तयः सन्त, लेखनस्य प्रकारश्च त्रिपाद इति दृश्यते। अत्र मध्ये मूलग्रन्थः, उपरि अधश्च तस्य टीका वर्तते। अक्षरोऽपि तत्र सुस्पष्टः सुन्दरश्च वर्तते, अत्र प्रथमे अक्षरस्य परिमाणं किञ्चित् बृहत् वर्तते, परन्तु ९२ इति पत्रात् परम् अक्षरस्य परिमाणं किञ्चित् लघु वर्तते। देवनागरी लिप्यां वर्तते इयं मातृका। एवं प्रथम-परिशिष्टे अस्या मातृकाया आदावन्तयोः प्रतिलिपी दीयेते।

एवम् द्वितीयं भवति, ओरियेन्टाल रिसर्च इन्स्टीटयूट् इति संस्थायाः। मैसुरप्रदेशे च वर्तते इयं संस्था। अत्र शीर्षकस्थाने छान्दोग्योपनिषद्भाष्यमिति लिखितम् वर्तते। कर्ता च तत्र सायण-माधव-विद्यारण्य इति निरूपितम्। ग्रन्थालये मातृकानां स्थाननिर्देशसंख्या यथा एस पी २६७५ (S P 2675) इति। मातृका इयं ताडपत्रे वर्तते, लिपिश्च नन्दिनागरी इति। मातृका इयं न सम्पूर्णस्य उपनिषद्भाष्यस्य, अपि तु तत्र पञ्चम-षष्ठाध्याययोः निवेशः वर्तते। सर्वमाहत्य तत्र १४२ पत्राणि सन्ति। यद्यपि सम्पूर्णस्य भाष्यमत्र न लभ्यते, परन्तु भाष्यस्य व्याप्तिविषये निर्णयाय अस्याः महान् उपयोगः वर्तते।

एवञ्च बोधसौकर्याय मातृकाद्वयोः तालिका प्रदर्श्यते -

| **प्रथम-मातृका** | | **द्वितीय-मातृका** | |
|---|---|---|---|
| मातृकासङ्केतः | १. सङ्केतः - भ.१ | मातृकासङ्केतः | २. सङ्केतः - म.१ |
| प्राप्तिस्थानम् | भाण्डारकार-ओरियेन्टाल-रिसर्च-इन्स्टीट्यूट्, पूणे | प्राप्तिस्थानम् | ओरिएन्टाल-रिसर्च-इन्स्टीटयूट, मैसूर् |
| शीर्षकम् | छान्दोग्योपनिषद्दीपिका | शीर्षकम् | छान्दोग्योपनिषद्भाष्यम् |
| ग्रन्थकर्ता | सायणाचार्यः | ग्रन्थकर्ता | सायण-माधव-विद्यारण्य |
| संख्या (प्रचीनम्) | २१. विश्राम (१)<br>सेकशन ३.(नवीनम्) | संख्या (प्रचीनम्) | एस पी २६७५ |

| उपादनम् | कागज् | उपादनम् | ताडपत्रम् |
|---|---|---|---|
| लिपिः | देवनागरी | लिपिः | नन्दिनागरी |
| पत्र संख्या | २२३, (१९९ पत्रे छेदः) | पत्र संख्या | १-१४१ |
| परिमितिः | १२ ३/४" * ४ १/२" | परिमितिः | - |
| विशेषः | प्रत्येकस्मिन् पत्रे प्रायः सप्तपङ्क्तयः, त्रिपादप्रकारेण ग्रन्थोयं लिखितः। तत्र मध्ये मूलग्रन्थांशः, उपरि अधश्च भाष्यं दृश्यते। एवं १४८, २२३ इत्यभयोः पत्रयोः मध्ये रक्तवर्णरेखा परिलक्ष्यते। | विशेषः | मातृकेयम् अपूर्णरूपेण वर्तते। केवलं पञ्चषष्ठयो उपलब्धिः जायते। यद्यपि अपूर्णरूपेण वर्तते, तथापि सायणकर्तृत्वविषये निर्णयाय अस्य महान् उपयोगः वर्तते। |

एवञ्च मातृकाद्वयं विहाय निउ क्याटालोगास् क्याटागोराम् (New Catalogus Catalogorum) इत्यस्मात् अस्माभिरस्या मातृकायाः विषये यानि तथ्यानि, शोधसम्बद्धतया सङ्कलितानि, तानि द्वितीय-परिशिष्टे पृथग्रूपेण निरूपयिष्यन्ते।

अथेदानीं छान्दोग्योपनिषद्दीपकेति नाम्नि प्रकाशितस्य ग्रन्थस्य विषये आलोच्यते। श्रीगङ्गेश्वरानन्द-उदासीनेन निर्देशितम्, डा. गौतम-पटेल इत्यनेन सम्पादितम्। अस्य प्रथमप्रकाशनं १९८९ खीष्टाब्दे, आमेदावाद-प्रदेशात् जातमिति। अत्र सम्पादकेन मुख्यतया मातृकाद्वयो उपगोयः कृतः। परन्तु ग्रन्थस्य पर्यालोचनेन इदं निश्चयेन वक्तुं शक्यते यत् नेदं समालोचनात्मकमिति।

**५. प्रकृतविषयस्य उपलब्धिविषये विचारो निर्णयश्च -** एवञ्च व्याप्तिविषये अस्माभिः यत् परिलक्षितं, तदनुसारेण मातृकाया अपि च प्रकाशितग्रन्थाधारेण इदमिदानीं छान्दोग्योपनिषदः कियती उपलब्धिरिति निश्चियते। तत्र प्रथमत अस्माभिः मातृकाया उपरि अवधानं दीयते। अस्या मातृकायाः प्रारम्भे "वागीशाद्याः सुमनसः.." इत्यादयः मङ्गलरूपेण वर्तते। एवञ्च पुष्पिकायां "इति श्रीराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरवुक्कभूपालसम्राज्य- धूरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उपनिषद् व्याख्यानेष्टमाध्यायस्य पञ्चदशः खण्डः। समाप्तश्चाध्यायः। समाप्ता छान्दोग्योपनिषद्। श्रीविद्याशङ्कराय नमः" इत्यादिना स्वयमेव स्वस्यपरिचयादिकं सूचयति यथा अन्यत्र भाष्येषु। तत्र छान्दोग्यब्राह्मणस्यादौ मन्त्रपर्वत्वेन, अपि च विद्यापर्वत्वेन द्वयो स्पष्टरूपेण भेदः कृतः सायणाचार्यैः। तद्यथा -

"तत्रोपनिषदाख्यो यः षष्ठो ग्रन्थः स च द्विधा।

मन्त्रपर्व च विद्येति विद्याङ्गत्वेन पर्वणः।"[13]

एवञ्च अपेक्षितस्थलेषु वैयासिकन्यायमालामुद्धरति सायणाचार्यः, प्रायः विद्यागुरूणां मध्ये अन्यतमेन भारतीतीर्थस्वामिना प्रणितत्वात् तस्योपयोगः कृतः।

एवं द्वितीयमातृकायाः उपयोगेन संशायास्पदस्थलेषु निर्णयाय महान् उपयोगः परिलक्षितः। यतो हि द्वयोः स्थितावेव तुलना सम्भवति, अन्यथा नोपपद्यते।

अतः अन्ते पैटेलमहोदयेन सम्पादितं पुस्तकं आमूलचुडं परिलक्ष्य इदं निश्यतेन वक्तुं शक्यते यत् छान्दोग्योपनिषदः कृति, पूर्णतया अष्टाध्याये प्राप्यते, यतो हि सायणाचार्येण अस्या भूमिकाभाष्ये प्रतिज्ञातं यत् - "यत्राष्टाध्यायपाठस्य श्रीमच्छङ्करभगवत्पूज्यपादैादृतत्वात् तत्प्रसादोपजीविभिरस्माभिरपि स एव पाठः प्राधान्येन व्याख्यस्यते, अक्षरविषेषाश्च शाखान्तररीयास्तत्र तत्र प्रदर्शयिष्यन्ते।"[14] इति।

**६. प्रकृतविषयस्य सायणकर्तृत्वविषये विचारो निर्णयश्च -** प्रकृते उपनिषद्भाष्यस्य सायणकर्तृत्वविषये अधुना विचार्यते। यतो हि सम्पूर्णस्य अस्य वेदार्थप्रकाशस्य कर्ता सायणाचार्यः न वा इति अद्यापि संशयस्थलम्। यतो हि भाष्यगतभाषासाम्यवैषम्य विचारेण विदुषैः न एककर्तृत्व न गण्यते। परन्तु प्रकृते तु उपनिषदः कर्तृत्वं सायणाचार्याणामेव इति निश्चयेन वक्तुं शक्यते, तत्र कारणत्वेन द्वित्राणां मुख्यांशानामुल्लेखः क्रियते।

अथ प्रथमतया शङ्करभगवत्पादानां मतानुसारेण सम्पूर्णं भाष्यमरचयत्। तत्र सायणाचार्य ऋग्वेदभाष्ये अलिखत् यत् - "सर्वैर्वेदैः खलु ब्रह्माधिगम्यते। ननूपनिषद्भागानां तथास्तु। इतरेषां तु कथं ब्रह्मविषयत्वमिति। उच्यते। यद्यपीतरभागानां यागादिविषयत्वं तथापि बुद्धिशुद्ध्युत्पादनसाधनत्वेन ब्रह्मविषयत्वं भविष्यति"[15]। एवम् आभाष्यं सायाणाचार्यैः भगवत्पादराद्धान्त एव अनुसृतः, यथा अन्यत्र संहितादिभाष्यादिषु।

द्वितीयं तु भाषाशैली, तत्र भगवत्पादभाष्यविषये यथा भाष्यं प्रसन्नगम्भीरमिति भामतीकारैः प्रयुक्तम्, तथा अत्रापि सायणाचार्यानां भाष्यविषये वक्तुं शक्यते। सरलभाषया शब्दानां नूतनातया व्याख्यानम् अपि च भगवत्पादभाष्ये अपूर्णरूपेण यानि उदाहरणानि वर्तन्ते, तेषां पूर्णरूपेण विस्तार अत्र दृश्यते।

एवञ्च तृतीयं भवति वेदविदुषः सायणाचार्यस्य संहिता, उपनिषदादिप्रमाणानि ब्राह्मण-आरण्यक-श्रोतसूत्र-गृह्यसूत्र-कल्पसूत्रादीनि। क्वचित् पुराणसाहित्यात् उदाहरणानि अत्र दृश्यन्ते। एवं चतुर्वेदभाष्यभूमिकायामपि अस्माभिरिदं परिलक्षितुं शक्यते।

---

[13] छान्दोग्यब्राह्मणम्, पृ. ३.

[14] छान्दोग्योपनिषद्दीपिका, पृ. ३.

[15] ऋग्वेदभाष्यम्, १.१६९.३४

अन्ते च पूर्वत्तरविषययोः सङ्गतिरिति शास्त्रनियमात्, सायणाचार्येनापि छान्दोग्यब्राह्मणस्य मन्त्रपर्वस्य अपि च उपनिषद्भागस्य उपोद्घाते समानतया एव प्रतिपादनं विहितम् यथा ब्राह्मणभागे उपोद्घाते भगवत्पादीय ब्रह्मसूत्रभाष्यात् वेधाद्यर्थभेदादिति सूत्रं सम्पूर्णरूपेण उद्धृत्य, अन्ते सिद्धान्ततया उक्तं यत् - "तदेवमुक्तरीत्या देवसवितरित्यादीनां सिद्धे विद्याङ्गत्वेन लिङ्गादवश्यं कर्माङ्गत्वमभ्युपेयम्..."[16] इति। एवं उपनिषदोपद्घाते तै आलोचितं यत् - "यथा पूर्वकाण्डस्य धर्ममीमांसा पृथगेव विरचिता, तथैवोपासनाकाण्डस्यापि भिन्नैव मीमांसोचितेति चेत्, वाढम्। तथापि तयोः काण्डयोर्बह्मविषयत्वं समानमित्यभिप्रेत्यैकैव ब्रह्ममीमांसा विरचिता"[17] इति।

**७. शोधनिष्कर्षः**

छान्दोग्योपनिषदः श्रीसायणाचार्यकृतभाष्यं पूर्णरूपेण उपलभ्यते। प्रकाशिताप्रकाशितरूपेण यद्यपि केचित् अद्यापि दृष्टिपदवीं न समायाताः, तथापि तेषां संग्रहेण तुलनात्मतया अध्ययनमपेक्ष्यते। एवञ्च अस्योपरि अग्रिमगवेषणस्य अवकाशविषये प्रथमतया इदं वक्तु शक्यते, अद्यापि उपलब्धासु मातृकासु अवधानं दत्वा पुनःसम्पादनं करणीयं, ततश्च भगवत्पादीयभाष्येण सह अस्य भाष्यस्य तुलनात्मकतया अध्ययनं स्यात्। अपि च, गुणविष्णोः भाष्यस्य अस्य ब्राह्मणभागस्य भाष्ये कियान् प्रभावो वर्तते इत्यपि अग्रिमगवेषणस्य विषयत्वेन गणयितुं शक्यते।

**८. उपसंहारः**

माधवीयवेदार्थप्रकाशाख्यस्य सामवेदार्थप्रकाशनाम्नि छान्दोग्योपनिषद्भाष्यं श्रीसायणाचार्यकृतमिति "लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति"[18] न्यायात् सिद्धतीति शिवम्।

*******

[16] छान्दोग्यब्राह्मणम्, पृ. ४.

[17] छान्दोग्योपनिषद्दीपिका, पृ. ३.

[18] ऋग्वेदभाष्यम्, उपक्रमणिका

## परिशिष्टम् १

(भ.१ मातृकाया आदिमं पत्रम्)



(भ.१ मातृकाया अन्तिममं पत्रम्)



## परिशिष्टम् २

छान्दोग्योपनिषद्भाष्यम्[19]

- Circa Bhāṣya by Sāyaṇācārya Manuscripts in the Bhandarkar Oriental Research Institute, Deccan Gymkhana, Poona-4. Quoted by manuscript numbers of the Library.
- A Copy of the complete card index of the BORI. Manuscripts, prepared in 1940. 31 of 1895-1902. 21 of Viś. (i). Notices of Sanskrit Manuscripts. Second Series. By Hara

[19] NCC, XXXVIII, P. 335

Prasada Shastri. Four Volumes. Govt. of Bengal, Calcutta, 1900, 1904, 1907, 1911. Quoted by numbers. III. 98.

- A Supplementary Catalogue of Sanskrit works in the Sarasvati Bhandaram Library of His Highness the Maharaja of Mysore. Signed by F. Kielhorn, 9 pages. I. page 430.
- A Supplementary Catalogue of Sanskrit works in the Sarasvati Bhandaram Library of His Highness the Maharaja of Mysore. Signed by F. Kielhorn, 9 pages. dated III. 269 (chs. 5 anonymous 6).
- A Catalogue of Sanskrit manuscripts in the Library of the Deccan College. Part I. Prepared under the superintendence of F. Kielhorn. Part II and Index prepared under the superintendence of R. G. Bhandarkar, 1884. 61 pages. Quoted by numbers. 21.

***Addl. mss.:***[20]

- A list of Sanskrit manuscripts in the Municipal Museum, Allahabad. Prepared on the basis of the slips preserved in the Museum. Quoted by the library number. dated I. 2460. 2469.
- A Supplementary Catalogue of Sanskrit works in the Sarasvati Bhandaram Library of His Highness the Maharaja of Mysore. Signed by F. Kielhorn, 9 pages. N. dated I. 1176. part. 1909.

---

**परिशिष्टम् ३**

| क्रमः | उपनिषत् | पृष्ठाङ्कः |
|---|---|---|

[20] NCC, XXXVIII, P. 335

| | | |
|---|---|---|
| १. | आरण्यकोपनिषद्भाष्यम् | NCC, XXXVIII, P. 333 |
| २. | आरुण्योपनिषद्भाष्यम् | NCC, XXXVIII, P. 333 |
| ३. | ईशावास्योपनिषद्भाष्यम् | NCC, II, P. 267,<br>[Add.] NCC, XXXVIII, P. 334 |
| ४. | ऐतरयोपनिषद्भाष्यम् | NCC, XXXVIII, P. 334,<br>[Add.] NCC, XXXVIII, P. 334 |
| ५. | कठवल्ल्युपनिषद्भाष्यम् | NCC, XXXVIII, P. 334, |
| ६. | कैवल्योपनिषद्भाष्यम् | NCC, XXXVIII, P. 334 |
| ७. | कौशितक्योपनिषद्भाष्यम् | NCC, XXXVIII, P. 335 |
| ८. | चैत्युपनिषद्भाष्यम् | NCC, VII, P. 36.a,<br>[Add.] NCC, XXXVIII, P. 335 |
| ९. | छान्दोग्योपनिषद्भाष्यम् | NCC, XXXVIII, P. 335, |
| १०. | जाबालोपनिषद्भाष्यम् | NCC, XXXVIII, P. 335 |
| ११. | तैत्तिरीयोपनिषद्भाष्यम् | NCC, XXXVIII, P. 336 |
| १२. | याज्ञिक्युपनिषद्भाष्यम् | NCC, XXXVIII, P. 336 |
| १३. | नारायणार्थवशिरोपनिषद्भाष्यम् | NCC, XXXVIII, P. 336 |
| १४. | परमहंसोपनिषद्भाष्यम् | NCC, XXXVIII, P. 336 |
| १५. | पिण्डोपनिषद्भाष्यम् | NCC, XXXVIII, P. 336 |
| १६. | भृगुवल्ल्योपनिषद्भाष्यम् | NCC, XVII, P. 220,<br>[Add.] NCC, XXXVIII, P. 337 |

| | | |
|---|---|---|
| १७. | माण्डूक्योपनिषद्भाष्यम् | NCC, XXXVIII, P. 337 |
| १८. | संहितोपनिषद्भाष्यम् | NCC, XXXVIII, P. 337,<br>[Add.] NCC, XXXIV, P. 43 |

## Bibliography


Basu, Yogiraj. *Vedera Paricaya* (Ben.) (3rd Edition). Kolkata: Farma K. L. Private Limited, 2009.

Chakraborty, Samirancandra. *Brāhmaṇasaṃgrahaḥ* (Eng.). Kolkata: Sāhitya Akādemī, 2004.

*Chāndogyobrāhmaṇamn* (San.), (Both the Commentary of *Guṇaviṣṇuḥ* and Sāyaṇācāryaḥ). Ed. Durgamohan Bhattacharya. Calcutta: Sanskrit College, 1958.

__, (With the Commentary of *Guṇaviṣṇuḥ*), Ed. Durgamohan Bhattacharya. Calcutta: Sanskrit Sahitya Parishad, 1930.

*Das Mantrabrāhmaṇa* (Eng.) (First Prapāṭhakaḥ), Ed. Heinrich Stönner Halle a. S 1901.

*Das Mantrabrāhmaṇa* (Eng.) (Second Prapāṭhakaḥ), Ed. Hans Jørgensen, Darmstadt, 1911.

Gode, P. K. *"Oldest Dated Manuscript of Sāyaṇa's commentary on the Sāmaved"* Annals of the Bhandarkar Oriental Research Institute, 1938-39, Vol. 20, No. 2 (1938-39), pp. 145-152.<http://www.jstor.com/stable/41688875>

Maharṣiśonakaḥ. *Caraṇavyūhasūtram* (San.) (With the commentary of Ācārya Mahidāsa), Kāśī Saṃskṛta Granthamālā 132, Varanasi: Caukhāmbhā Saṃskṛta Saṃsthāna, 1994. (4th Edition).

*Mantrabrāhmaṇa* (San.), Ed. Satyavrata Samashrami, *Pratnakamranandinī* (Vol. V), Sereampore, 1872.

__, Ed. Satyavrata Samashrami, Kolkata, 1890.

Muller, F. Max. Sacred Books of The East (by Various Original Scholars) (Eng.). Vol I. London: Oxford, 1900.

Narasimhacharya, R. *"Madhavacharya and his younger Brother."* Indian Antiquary (A journal of Oriantal Research). Vol XLV. Ed. Sri Richard Carnac Temple and Prof Devadatta Ramakrishna Bhandarkar. Bombay, 1916. <https://indianculture.gov.in/flipbook/32843>

*New Catalogus Catalogorum*, (An Alphabetical Register of Sanskrit and Allied works and Authors), Vol XXXIX, Dr. Siniruddha Dash (Ed.). University of Madras 2015.

__, __, Vol XXXVII, Dr. Siniruddha Dash (Ed.). University of Madras 2015.

__, __, Vol XXXVIII, Dr. Siniruddha Dash (Ed.). University of Madras 2015.

Sastri, S. Srikanta. *"Development of Sanskrit Literature under Vijayanagara,"*. <www.srikanta-sastri.org>

Sāyaṇācāryaḥ. *Vedabhāṣyabhūmikāsaṃgrahaḥ* (San.). Baladeva Upādhyāyaḥ (Ed.). Kāśī Saṃskṛta Granthamālā 102. Varanasi: Caukhāmbā Saṃskṛta Series Office, 1958. (2nd Edition).

Śrīśaṅkarācāryaḥ. *Śrīmadbhagavadgītāṣyam* (San.) (Khaṇḍaḥ 1). Ed. Shri Mani Dravid Shastri. Varanasi: Sri Dakshinamurthy prakashana, 2015

.__, __, (Khaṇḍaḥ 2). Ed. Shri Mani Dravid Shastri. Varanasi: Sri Dakshinamurthy prakashana, 2015.

Śrīśaṅkarācāryaḥ. *Upaniṣadbhāṣyam.* (San.) (Khaṇḍaḥ 1). Ed. S. Subrahmanya Sastri. Varanasi: Sri Dakshinamurthy prakashana, 2018.

__, __, (Khaṇḍaḥ 2). Ed. S. Subrahmanya Sastri. Varanasi: Sri Dakshinamurthy prakashana, 2018.

__, __, (Khaṇḍaḥ 3). Ed. S. Subrahmanya Sastri. Varanasi: Sri Dakshinamurthy prakashana, 2018.

<https://advaitasharada.sringeri.net/> Advaitasāradā

<https://vmlt.in/ncc/1?page=1> New Catalogus Catalogorum

<https://archive.org/> Internet Archive

<https://ndl.iitkgp.ac.in/> National Digital Library of India

<https://www.namami.gov.in/> National Manuscript Mission

<http://vedicheritage.gov.in/> Vaidic Heritage Portal

<https://borilib.com/repository> Bori Online Library

<https://www.worldcat.org/> World Catalogue

<https://indcat.inflibnet.ac.in/index.php/search> Indian Catalogue

*****